गमिष्यति	गमिष्यत:	गमिष्यन्ति	प्र०	द्रक्ष्यति	द्रक्ष्यत:	द्रक्ष्यन्ति
गमिष्यसि	गमिष्यथ:	गमिष्यथ	म०	द्रक्ष्यसि	द्रक्ष्यथ:	द्रक्ष्यथ
गमिष्यामि	गमिष्याव:	गमिष्याम:	उ०	द्रक्ष्यामि	द्रक्ष्याव:	द्रक्ष्याम:

(१०) सद् (बैठना) (दे० अ० ५-९) **(११) स्था (देखना) (दे० अ० ५-९)**

सूचना-भू के तुल्य रूप चलेंगें। सद् को लट्, लोट्, लङ्, विधिलिङ् में सीद् होता है।

सूचना-भू के तुल्य रूप चलेंगें। स्था को लट्, लोट्, लङ्, विधिलिङ् में तिष्ठ् होता है।

	सद्			स्था	
	लट्				**लट्**	
सीदति	सीदतः	सीदन्ति	प्र०	तिष्ठति	तिष्ठतः	तिष्ठन्ति
सीदसि	सीदथः	सीदथ	म०	तिष्ठसि	तिष्ठथः	तिष्ठथ
सीदामि	सीदावः	सीदामः	उ०	तिष्ठामि	तिष्ठावः	तिष्ठामः
	लोट्				**लोट्**	
सीदतु	सीदताम्	सीदन्तु	प्र०	तिष्ठतु	तिष्ठताम्	तिष्ठन्तु
सीद	सीदतम्	सीदत	म०	तिष्ठ	तिष्ठतम्	तिष्ठत
सीदानि	सीदाव	सीदाम	उ०	तिष्ठानि	तिष्ठाव	तिष्ठाम
	लङ्				**लङ्**	
असीदत्	असीदताम्	असीदन्	प्र०	अतिष्ठत्	अतिष्ठताम्	अतिष्ठन्
असीदः	असीदतम्	असीदत	म०	अतिष्ठः	अतिष्ठतम्	अतिष्ठत
असीदम्	असीदाव	असीदाम	उ०	अतिष्ठम्	अतिष्ठाव	अतिष्ठाम
	विधिलिङ्				**विधिलिङ्**	
सीदेत्	सीदेताम्	सीदेयुः	प्र०	तिष्ठेत्	तिष्ठेताम्	तिष्ठेयुः
सीदेः	सीदेतम्	सीदेत	म०	तिष्ठेः	तिष्ठेतम्	तिष्ठेत
सीदेयम्	सीदेव	सीदेम	उ०	तिष्ठेयम्	तिष्ठेव	तिष्ठेम
	लृट्				**लृट्**	
सत्स्यति	सत्स्यतः	सत्स्यन्ति	प्र०	स्थास्यति	स्थास्यतः	स्थास्यन्ति
सत्स्यसि	सत्स्यथः	सत्स्यथ	म०	स्थास्यसि	स्थास्यथः	स्थास्यथ
सत्स्यामि	सत्स्यावः	सत्स्यामः	उ०	स्थास्यामि	स्थास्यावः	स्थास्यामः

(१२) पा (पीना) (भू के तुल्य)

सूचना–पा को लट्, लोट्, लङ्, विधिलिङ् में पिब् होता है।

(१३) स्मृ (स्मरण करना) (दे० अ० ५-९)

सूचना–भू के तुल्य रूप चलेंगें।

	लट्				लट्	
पिबति	पिबतः	पिबन्ति	प्र०	स्मरति	स्मरतः	स्मरन्ति
पिबसि	पिबथः	पिबथ	म०	स्मरसि	स्मरथः	स्मरथ
पिबामि	पिबावः	पिबामः	उ०	स्मरामि	स्मरावः	स्मरामः
	लोट्				लोट्	
पिबतु	पिबताम्	पिबन्तु	प्र०	स्मरतु	स्मरताम्	स्मरन्तु
पिब	पिबतम्	पिबत	म०	स्मर	स्मरतम्	स्मरत
पिबानि	पिबाव	पिबाम	उ०	स्मराणि	स्मराव	स्मराम
	लङ्				लङ्	
अपिबत्	अपिबताम्	अपिबन्	प्र०	अस्मरत्	अस्मरताम्	अस्मरन्
अपिबः	अपिबतम्	अपिबत	म०	अस्मरः	अस्मरतम्	अस्मरत
अपिबम्	अपिबाव	अपिबाम	उ०	अस्मरम्	अस्मराव	अस्मराम
	विधिलिङ्				विधिलिङ्	
पिबेत्	पिबेताम्	पिबेयुः	प्र०	स्मरेत्	स्मरेताम्	स्मरेयुः
पिबेः	पिबेतम्	पिबेत	म०	स्मरेः	स्मरेतम्	स्मरेत
पिबेयम्	पिबेव	पिबेम	उ०	स्मरेयम्	स्मरेव	स्मरेम
	लृट्				लृट्	
पास्यति	पास्यतः	पास्यन्ति	प्र०	स्मरिष्यति	स्मरिष्यतः	स्मरिष्यन्ति
पास्यसि	पास्यथः	पास्यथ	म०	स्मरिष्यसि	स्मरिष्यथः	स्मरिष्यथ
पास्यामि	पास्यावः	पास्यामः	उ०	स्मरिष्यामि	स्मरिष्यावः	स्मरिष्यामः

(१४) जि (जीतना) (भू के तुल्य) लट्—जयति, जयतः, जयन्ति। जयसि, जयथः, जयथ। जयामि, जयावः, जयामः। **लोट्**—जयतु, जयताम्, जयन्तु। जय, जयतम्, जयत। जयानि, जयाव, जयाम। **लङ्**—अजयत्, अजयताम्, अजयन्। अजयः, अजयतम्, अजयत। अजयम्, अजयाव, अजयाम। **विधिलिङ्**—जयेत्, जयेताम्, जयेयुः। जयेः, जयेतम्, जयेत। जयेयम्, जयेव, जयेम। **लृट्**—जेष्यति, जेष्यतः, जेष्यन्ति। जेष्यसि, जेष्यथः, जेष्यथ। जेष्यामि, जेष्यावः, जेष्यामः।

आत्मनेपदी धातुएँ

(१५) **सेव्** (सेवा करना) लट् (वर्तमान) (१५) लट् (सं० रूप) (दे० अ० १८)

सेवते	सेवेते	सेवन्ते	प्र० पु०	अते	एते	अन्ते
सेवसे	सेवेथे	सेवध्वे	म० पु०	असे	एथे	अध्वे
सेवे	सेवावहे	सेवामहे	उ० पु०	ए	आवहे	आमहे

लोट् (आज्ञा अर्थ)　　लोट् (सं० रूप) (दे० अ० १९)

सेवताम्	सेवेताम्	सेवन्ताम्	प्र० पु०	अताम्	एताम्	अन्ताम्
सेवस्व	सेवेथाम्	सेवध्वम्	म० पु०	अस्व	एथाम्	अध्वम्
सेवै	सेवावहै	सेवामहै	उ० पु०	ऐ	आवहै	आमहै

लङ् (अनद्यतन भूतकाल)　　लङ् (सं० रूप) (दे० अ० २०)

असेवत	असेवेताम्	असेवन्त	प्र० पु०	अत	एताम्	अन्त
असेवथाः	असेवेथाम्	असेवध्वम्	म० पु०	अथाः	एथाम्	अध्वम्
असेवे	असेवावहि	असेवामहि	उ० पु०	ए	आवहि	आमहि

सूचना—धातु के पहले 'अ' लगेगा।

विधिलिङ् (आज्ञा या चाहिए अर्थ)　　विधिलिङ् (सं० रूप) (दे० अ० २१)

सेवेत	सेवेयाताम्	सेवेरन्	प्र० पु०	एत	एयाताम्	एरन्
सेवेथाः	सेवेयाथाम्	सेवेध्वम्	म० पु०	एथाः	एयाथाम्	एध्वम्
सेवेय	सेवेवहि	सेवेमहि	उ० पु०	एय	एवहि	एमहि

लृट् (भविष्यत्)　　लृट् (सं० रूप) (दे० अ० २२)

सेविष्यते	सेविष्येते	सेविष्यन्ते	प्र० पु०	इष्यते	इष्येते	इष्यन्ते
सेविष्यसे	सेविष्येथे	सेविष्यध्वे	म० पु०	इष्यसे	इष्येथे	इष्यध्वे
सेविष्ये	सेविष्यावहे	सेविष्यामहे	उ० पु०	इष्ये	इष्यावहे	इष्यामहे

सूचना—(१) कुछ धातुओं में इष्यते वाले रूप लगते हैं और कुछ में स्यते, स्येते, स्यन्ते आदि बिना इ वाले रूप लगते हैं।

(२) भ्वादिगण (१) की आत्मनेपदी सभी धातुओं के रूप पाँचों लकारों में सेव् धातु के तुल्य चलते हैं। उपर्युक्त संक्षिप्त रूप अन्त में लगेंगे।

(१६) लभ् (पाना) (दे० अ० १८-२२) (१७) वृध् (बढ़ना) (दे० अ० १८-२२)

सूचना-सेव् के तुल्य रूप चलेंगे। सूचना-सेव् के तुल्य रूप चलेंगे।

	लट्				लट्	
लभते	लभेते	लभन्ते	प्र०	वर्धते	वर्धेते	वर्धन्ते
लभसे	लभेथे	लभध्वे	म०	वर्धसे	वर्धेथे	वर्धध्वे
लभे	लभावहे	लभाभहे	उ०	वर्धे	वर्धावहे	वर्धामहे
	लोट्				लोट्	
लभताम्	लभेताम्	लभन्ताम्	प्र०	वर्धताम्	वर्धेताम्	वर्धन्ताम्
लभस्व	लभेथाम्	लभध्वम्	म०	वर्धस्व	वर्धेथाम्	वर्धध्वम्
लभै	लभावहै	लभामहै	उ०	वर्धै	वर्धावहै	वर्धामहै
	लङ्				लङ्	
अलभत	अलभेताम्	अलभन्त	प्र०	अवर्धत	अवर्धेताम्	अवर्धन्त
अलभथाः	अलभेथाम्	अलभध्वम्	म०	अवर्धथाः	अवर्धेथाम्	अवर्धध्वम्
अलभे	अलभावहि	अलभामहि	उ०	अवर्धे	अवर्धावहि	अवर्धामहि
	विधिलिङ्				विधिलिङ्	
लभेत	लभेयाताम्	लभेरन्	प्र०	वर्धेत	वर्धेयाताम्	वर्धेरन्
लभेथाः	लभेयाथाम्	लभेध्वम्	म०	वर्धेथाः	वर्धेयाथाम्	वर्धेध्वम्
लभेय	लभेवहि	लभेमहि	उ०	वर्धेय	वर्धेवहि	वर्धेमहि
	लृट्				लृट्	
लप्स्यते	लप्स्येते	लप्स्यन्ते	प्र०	वर्धिष्यते	वर्धिष्येते	वर्धिष्यन्ते
लप्स्यसे	लप्स्येथे	लप्स्यध्वे	म०	वर्धिष्यसे	वर्धिष्येथे	वर्धिष्यध्वे
लप्स्ये	लप्स्यावहे	लप्स्यामहे	उ०	वर्धिष्ये	वर्धिष्यावहे	वर्धिष्यामहे

(१८) मुद् (प्रसन्न होना) (दे० अ० १८-२२) (१९) सह् (सहना) (दे० अ० १८-२२)

सूचना-सेव् के तुल्य रूप चलेंग। सूचना-सेव् के तुल्य रूप चलेंगें।

	लट्				लट्	
मोदते	मोदेते	मोदन्ते	प्र०	सहते	सहेते	सहन्ते
मोदसे	मोदेथे	मोदध्वे	म०	सहसे	सहेथे	सहध्वे
मोदे	मोदावहे	मोदामहे	उ०	सहे	सहावहे	सहामहे
	लोट्				लोट्	
मोदताम्	मोदेताम्	मोदन्ताम्	प्र०	सहताम्	सहेताम्	सहन्ताम्
मोदस्व	मोदेथाम्	मोदध्वम्	म०	सहस्व	सहेथाम्	सहध्वम्
मोदै	मोदावहै	मोदामहै	उ०	सहै	सहावहै	सहामहै
	लङ्				लङ्	
अमोदत	अमोदेताम्	अमोदन्त	प्र०	असहत	असहेताम्	असहन्त
अमोदथाः	अमोदेथाम्	अमोदध्वम्	म०	असहथाः	असहेथाम्	असहध्वम्
अमोदे	अमोदावहि	अमोदामहि	उ०	असहे	असहावहि	असहामहि
	विधिलिङ्				विधिलिङ्	
मोदेत	मोदेयाताम्	मोदेरन्	प्र०	सहेत	सहेयाताम्	सहेरन्
मोदेथाः	मोदेयाथाम्	मोदेध्वम्	म०	सहेथाः	सहेयाथाम्	सहेध्वम्
मोदेय	मोदेवहि	मोदेमहि	उ०	सहेय	सहेवहि	सहेमहि
	लृट्				लृट्	
मोदिष्यते	मोदिष्येते	मोदिष्यन्ते	प्र०	सहिष्यते	सहिष्येते	सहिष्यन्ते
मोदिष्यसे	मोदिष्येथे	मोदिष्यध्वे	म०	सहिष्यसे	सहिष्येथे	सहिष्यध्वे
मोदिष्ये	मोदिष्यावहे	मोदिष्यामहे	उ०	सहिष्ये	सहिष्यावहे	सहिष्यामहे

(२०) याच् (माँगना) (सेव् के तुल्य) | **(२१) नी (ले जाना) उभयपदी धातु**

	लट्				लट्	
याचते	याचेते	याचन्ते	प्र०	नयति	नयतः	नयन्ति
याचसे	याचेथे	याचध्वे	म०	नयसि	नयथः	नयथ
याचे	याचावहे	याचामहे	उ०	नयामि	नयावः	नयामः
	लोट्				लोट्	
याचताम्	याचेताम्	याचन्ताम्	प्र०	नयतु	नयताम्	नयन्तु
याचस्व	याचेथाम्	याचध्वम्	म०	नय	नयतम्	नयत
याचै	याचावहै	याचामहै	उ०	नयानि	नयाव	नयाम
	लङ्				लङ्	
अयाचत	अयाचेताम्	अयाचन्त	प्र०	अनयत्	अनयताम्	अनयन्
अयाचथाः	अयाचेथाम्	अयाचध्वम्	म०	अनयः	अनयतम्	अनयत
अयाचे	अयाचावहि	अयाचामहि	उ०	अनयम्	अनयाव	अनयाम
	विधिलिङ्				विधिलिङ्	
याचेत	याचेयाताम्	याचेरन्	प्र०	नयेत्	नयेताम्	नयेयुः
याचेथाः	याचेयाथाम्	याचेध्वम्	उ०	नयेः	नयेतम्	नयेत
याचेय	याचेवहि	याचेमहि	म०	नयेयम्	नयेव	नयेम
	लृट्				लृट्	
याचिष्यते	याचिष्येते	याचिष्यन्ते	प्र०	नेष्यति	नेष्यतः	नेष्यन्ति
याचिष्यसे	याचिष्येथे	याचिष्यध्वे	म०	नेष्यसि	नेष्यथः	नेष्यथ
याचिष्ये	याचिष्यावहे	याचिष्यामहे	उ०	नेष्यामि	नेष्यावः	नेष्यामः

(२१) नी (आत्मनेपद)—लट् नयते, नयेते, नयन्ते। नयसे, नयेथे, नयध्वे। नये, नयावहे, नयामहे। **लोट्**—नयताम्, नयेताम्, नयन्ताम्। नयस्व, नयेथाम्, नयध्वम्। नयै, नयावहै, नयामहै। **लङ्**—अनयत, अनयेताम्, अनयन्त। अनयथाः, अनयेथाम्, अनयध्वम्। अनये, अनयावहि, अनयामहि। **विधिलिङ्**—नयेत, नयेयाताम्, नयेरन् नयेथाः, नयेयाथाम्, नयेध्वम्। नयेय, नयेवहि, नयेमहि। **लृट्**—नेष्यते, नेष्येते, नेष्यन्ते। नेष्यसे, नेष्येथे, नेष्यध्वे। नेष्ये, नेष्यावहे, नेष्यामहे।

(२२) हृ (ले ज़ाना) उभयपदी धातु (भू और सेव् के तुल्य)

	परस्मैपद— लट्				आत्मनेपद—लट्	
हरति	हरतः	हरन्ति	प्र०	हरते	हरेते	हरन्ते
हरसि	हरथः	हरथ	म०	हरसे	हरेथे	हरध्वे
हरामि	हरावः	हरामः	उ०	हरे	हरावहे	हरामहे
	लोट्				लोट्	
हरतु	हरताम्	हरन्तु	प्र०	हरताम्	हरेताम्	हरन्ताम्
हर	हरतम्	हरत	म०	हरस्व	हरेथाम्	हरध्वम्
हराणि	हराव	हराम	उ०	हरै	हरावहै	हरामहै
	लङ्				लङ्	
अहरत्	अहरताम्	अहरन्	प्र०	अहरत	अहरेताम्	अहरन्त
अहरः	अहरतम्	अहरत	म०	अहरथाः	अहरेथाम्	अहरध्वम्
अहरम्	अहराव	अहराम	उ०	अहरे	अहरावहि	अहरामहि
	विधिलिङ्				विधिलिङ्	
हरेत्	हरेताम्	हरेयुः	प्र०	हरेत	हरेयाताम्	हरेरन्
हरेः	हरेतम्	हरेत	म०	हरेथाः	हरेयाथाम्	हरेध्वम्
हरेयम्	हरेव	हरेम	उ०	हरेय	हरेवहि	हरेमहि
	लृट्				लृट्	
हरिष्यति	हरिष्यतः	हरिष्यन्ति	प्र०	हरिष्यते	हरिष्येते	हरिष्यन्ते
हरिष्यसि	हरिष्यथः	हरिष्यथ	म०	हरिष्यते	हरिष्येथे	हरिष्यध्वे
हरिष्यामि	हरिष्यावः	हरिष्यामः	उ०	हरिष्ये	हरिष्यावहे	हरिष्यामहे

(२३) अस् (होना) (दे० अ० १०-११) (२४) दा (देना) (दे० अ० ५-९)

सूचना-अस् को लृट् में भू हो जाता है। (परस्मैपद के रूप ये हैं)

अदादिगण-लट्				जुहोत्यादिगण-लट्		
अस्ति	स्तः	सन्ति	प्र०	ददाति	दत्तः	ददति
असि	स्थः	स्थ	म०	ददासि	दत्थः	दत्थ
अस्मि	स्वः	स्मः	उ०	ददामि	दद्वः	दद्मः
	लोट्				लोट्	
अस्तु	स्ताम्	सन्तु	प्र०	ददातु	दत्ताम्	ददतु
एधि	स्तम्	स्त	म०	देहि	दत्तम्	दत्त
असानि	असाव	असाम	उ०	ददानि	ददाव	ददाम
	लङ्				लङ्	
आसीत्	आस्ताम्	आसन्	प्र०	अददात्	अदत्ताम्	अददुः
आसीः	आस्तम्	आस्त	म०	अददाः	अदत्तम्	अदत्त
आसम्	आस्व	आस्म	उ०	अददाम्	अदद्व	अदद्म
	विधिलिङ्				विधिलिङ्	
स्यात्	स्याताम्	स्युः	प्र०	दद्यात्	दद्याताम्	दद्युः
स्याः	स्यातम्	स्यात	म०	दद्याः	दद्यातम्	दद्यात
स्याम्	स्याव	स्याम	उ०	दद्याम्	दद्याव	दद्याम
	लृट्				लृट्	
भविष्यति	भविष्यतः	भविष्यन्ति	प्र०	दास्यति	दास्यतः	दास्यन्ति
भविष्यसि	भविष्यथः	भविष्यथ	म०	दास्यसि	दास्यथः	दास्यथ
भविष्यामि	भविष्यावः	भविष्यामः	उ०	दास्यामि	दास्यावः	दास्यामः

(२५) दिव् (चमकना आदि) (दे० अ० ८) (२६) नृत् (नाचना) (दे० अ० ८)

सूचना–धातु में य लगाकर भू के तुल्य। **सूचना**– दिव् के तुल्य रूप चलेंगे।

दिवादिगण–लट्				लट्		
दीव्यति	दीव्यतः	दीव्यन्ति	प्र०	नृत्यति	नृत्यतः	नृत्यन्ति
दीव्यसि	दीव्यथः	दीव्यथ	म०	नृत्यसि	नृत्यथः	नृत्यथ
दीव्यामि	दीव्यावः	दीव्यामः	उ०	नृत्यामि	नृत्यावः	नृत्यामः
	लोट्				लोट्	
दीव्यतु	दीव्यताम्	दीव्यन्तु	प्र०	नृत्यतु	नृत्यताम्	नृत्यन्तु
दीव्य	दीव्यतम्	दीव्यत	म०	नृत्य	नृत्यतम्	नृत्यत
दीव्यानि	दीव्याव	दीव्याम	उ०	नृत्यानि	नृत्याव	नृत्याम
	लङ्				लङ्	
अदीव्यत्	अदीव्यताम्	अदीव्यन्	प्र०	अनृत्यत्	अनृत्यताम्	अनृत्यन्
अदीव्यः	अदीव्यतम्	अदीव्यत	म०	अनृत्यः	अनृत्यतम्	अनृत्यत
अदीव्यम्	अदीव्याव	अदीव्याम	उ०	अनृत्यम्	अनृत्याव	अनृत्याम
	विधिलिङ्				विधिलिङ्	
दीव्येत्	दीव्येताम्	दीव्येयुः	प्र०	नृत्येत्	नृत्येताम्	नृत्येयुः
दीव्येः	दीव्येतम्	दीव्येत	म०	नृत्येः	नृत्येतम्	नृत्येत
दीव्येयम्	दीव्येव	दीव्येम	उ०	नृत्येयम्	नृत्येव	नृत्येम
	लृट्				लृट्	
देविष्यति	देविष्यतः	देविष्यन्ति	प्र०	नर्तिष्यति	नर्तिष्यतः	नर्तिष्यन्ति
देविष्यसि	देविष्यथः	देविष्यथ	म०	नर्तिष्यसि	नर्तिष्यथः	नर्तिष्यथ
देविष्यामि	देविष्यावः	देविष्यामः	उ०	नर्तिष्यामि	नर्तिष्यावः	नर्तिष्यामः

(२७) नश् (नष्ट होना) (दे० अ० ८) **(२८) भ्रम्** (घूमना) (दे० अ० ८)

सूचना–दिव् के तुल्य रूप चलेंगे। **सूचना**–दिव् के तुल्य रूप चलेंगे।

	लट्				लट्	
नश्यति	नश्यतः	नश्यन्ति	प्र०	भ्राम्यति	भ्राम्यतः	भ्राम्यन्ति
नश्यसि	नश्यथः	नश्यथ	म०	भ्राम्यसि	भ्राम्यथः	भ्राम्यथ
नश्यामि	नश्यावः	नश्यामः	म०	भ्राम्यामि	भ्राम्यावः	भ्राम्यामः
	लोट्				लोट्	
नश्यतु	नश्यताम्	नश्यन्तु	प्र०	भ्राम्यतु	भ्राम्यताम्	भ्राम्यन्तु
नश्य	नश्यतम्	नश्यत	म०	भ्राम्य	भ्राम्यतम्	भ्राम्यत
नश्यानि	नश्याव	नश्याम	उ०	भ्राम्याणि	भ्राम्याव	भ्राम्याम
	लङ्				लङ्	
अनश्यत्	अनश्यताम्	अनश्यन्	प्र०	अभ्राम्यत्	अभ्राम्यताम्	अभ्राम्यन्
अनश्यः	अनश्यतम्	अनश्यत	म०	अभ्राम्यः	अभ्राम्यतम्	अभ्राम्यत
अनश्यम्	अनश्याव	अनश्याम	उ०	अभ्राम्यम्	अभ्राम्याव	अभ्राम्याम
	विधिलिङ्				विधिलिङ्	
नश्येत्	नश्येताम्	नश्येयुः	प्र०	भ्राम्येत्	भ्राम्येताम्	भ्राम्येयुः
नश्येः	नश्येतम्	नश्येत	म०	भ्राम्येः	भ्राम्येतम्	भ्राम्येत
नश्येयम्	नश्येव	नश्येम	उ०	भ्राम्येयम्	भ्राम्येव	भ्राम्येम
	लृट्				लृट्	
(क)						
नशिष्यति	नशिष्यतः	नशिष्यन्ति	प्र०	भ्रमिष्यति	भ्रमिष्यतः	भ्रमिष्यन्ति
नशिष्यसि	नशिष्यथः	नशिष्यथ	म०	भ्रमिष्यसि	भ्रमिष्यथः	भ्रमिष्यथ
नशिष्यामि	नशिष्यावः	नशिष्यामः	उ०	भ्रमिष्यामि	भ्रमिष्यावः	भ्रमिष्यामः
(ख)						
नङ्क्ष्यति	नङ्क्ष्यतः	नङ्क्ष्यन्ति	प्र०			
नङ्क्ष्यसि	नङ्क्ष्यथः	नङ्क्ष्यथ	म०			
नङ्क्ष्यामि	नङ्क्ष्यावः	नङ्क्ष्यामः	उ०			

सूचना – भ्रम् के रूप भू धातु के तुल्य भी चलते है। जैसे – भ्रमति, भ्रमतु, अभ्रमत्, भ्रमेत्, भ्रमिष्यति।

(२९) श्रु (सुनना) (दे० अ० २६-२७) (३०) **आप्** (पाना) (दे० अ० २६-२७)

	भ्वादिगण-लट् (श्रु को शृ)			**स्वादिगण-लट्**		
शृणोति	शृणुतः	शृण्वन्ति	प्र०	आप्नोति	आप्नुतः	आप्नुवन्ति
शृणोषि	शृणुथः	शृणुथ	म०	आप्नोषि	आप्नुथः	आप्नुथ
शृणोमि	शृणुवः	शृणुमः	उ०	आप्नोमि	आप्नुवः	आप्नुमः
	लोट् (श्रु को शृ)			लोट्		
शृणोतु	शृणुताम्	शृण्वन्तु	प्र०	आप्नोतु	आप्नुताम्	आप्नुवन्तु
शृणु	शृणुतम्	शृणुत	म०	आप्नुहि	आप्नुतम्	आप्नुत
शृणवानि	शृणवाव	शृणवाम	उ०	आप्नवानि	आप्नवाव	आप्नवाम
	लङ् (श्रु को शृ)			लङ्		
अशृणोत्	अशृणुताम्	अशृण्वन्	प्र०	आप्नोत्	आप्नुताम्	आप्नुवन्
अशृणोः	अशृणुतम्	अशृणुत	म०	आप्नोः	आप्नुतम्	आप्नुत
अशृणवम्	अशृणुव	अशृणुम	उ०	आप्नवम्	आप्नुव	आप्नुम
	विधिलिङ् (श्रु को शृ)			विधिलिङ्		
शृणुयात्	शृणुयाताम्	शृणुयुः	प्र०	आप्नुयात्	आप्नुयाताम्	आप्नुयुः
शृणुयाः	शृणुयातम्	शृणुयात	म०	आप्नुयाः	आप्नुयातम्	आप्नुयात
शृणुयाम्	शृणुयाव	शृणुयाम	उ०	आप्नुयाम्	आप्नुयाव	आप्नुयाम
	लृट्			लृट्		
श्रोष्यति	श्रोष्यतः	श्रोष्यन्ति	प्र०	आप्स्यति	आप्स्यतः	आप्स्यन्ति
श्रोष्यसि	श्रोष्यथः	श्रोष्यथ	म०	आप्स्यसि	आप्स्यथः	आप्स्यथ
श्रोष्यामि	श्रोष्यावः	श्रोष्यामः	उ०	आप्स्यामि	आप्स्यावः	आप्स्यामः

(३१) शक् (सकना)। **सूचना**—आप् के तुल्य रूप चलेंगें।

लट्—शक्नोति, शक्नुतः, शक्नुवन्ति। शक्नोषि, शक्नुथः, शक्नुथ। शक्नोमि, शक्नुवः, शक्नुमः। **लोट्**—शक्नोतु, शक्नुताम्, शक्नुवन्तु। शक्नुहि, शक्नुतम्, शक्नुत। शक्नवानि, शक्नवाव, शक्नवाम। **लङ्**—अशक्नोत्, अशक्नुताम्, अशक्नुवन्। अशक्नोः, अशक्नुतम्, अशक्नुत। अशक्नवम्, अशक्नुव, अशक्नुम। **विधिलिङ्**—शक्नुयात्, शक्नुयाताम्, शक्नुयुः। शक्नुयाः शक्नुयातम्, शक्नुयात। शक्नुयाम्, शक्नुयाव, शक्नुयाम। **लृट्**—शक्ष्यति, शक्ष्यतः, शक्ष्यन्ति। शक्ष्यसि, शक्ष्यथः, शक्ष्यथ। शक्ष्यामि, शक्ष्यावः, शक्ष्यामः।

(३२) तुद् (दुःख देना) (दे० अ० ६)

सूचना—तुद् को लट्, लोट्, लङ् और विधिलिङ् में गुण नहीं होगा। भू के तुल्य रूप चलेंगे।

(३३) इष् (चाहना) (दे० अ० ६)

सूचना—इष् को लट्, लोट्, लङ् और विधिलिङ् में इच्छ् होता है। भू के तुल्य रूप चलेंगे।

	तुदादिगण-लट्				लट्	
तुदति	तुदतः	तुदन्ति	प्र०	इच्छति	इच्छतः	इच्छन्ति
तुदसि	तुदथः	तुदथ	म०	इच्छसि	इच्छथः	इच्छथ
तुदामि	तुदावः	तुदामः	उ०	इच्छामि	इच्छावः	इच्छामः
	लोट्				लोट्	
तुदतु	तुदताम्	तुदन्तु	प्र०	इच्छतु	इच्छताम्	इच्छन्तु
तुद	तुदतम्	तुदत	म०	इच्छ	इच्छतम्	इच्छत
तुदानि	तुदाव	तुदाम	उ०	इच्छानि	इच्छाव	इच्छाम
	लङ्				लङ्	
अतुदत्	अतुदताम्	अतुदन्	प्र०	ऐच्छत्	ऐच्छताम्	ऐच्छन्
अतुदः	अतुदतम्	अतुदत	म०	ऐच्छः	ऐच्छतम्	ऐच्छत
अतुदम्	अतुदाव	अतुदाम	उ०	ऐच्छम्	ऐच्छाव	ऐच्छाम
	विधिलिङ्				विधिलिङ्	
तुदेत्	तुदेताम्	तुदेयुः	प्र०	इच्छेत्	इच्छेताम्	इच्छेयुः
तुदेः	तुदेतम्	तुदेत	म०	इच्छेः	इच्छेतम्	इच्छेत
तुदेयम्	तुदेव	तुदेम	उ०	इच्छेयम्	इच्छेव	इच्छेम
	लृट्				लृट्	
तोत्स्यति	तोत्स्यतः	तोत्स्यन्ति	प्र०	एषिष्यति	एषिष्यतः	एषिष्यन्ति
तोत्स्यसि	तोत्स्यथः	तोत्स्यथ	म०	एषिष्यसि	एषिष्यथः	एषिष्यथ
तोत्स्यामि	तोत्स्यावः	तोत्स्यामः	उ०	एषिष्यामि	एषिष्यावः	एषिष्यामः

(३४) प्रच्छ् (पूछना) (दे० अ० ६)

सूचना—लट्, लोट्, लङ् और विधिलिङ् में प्रच्छ् को पृच्छ् हो जाता है। भू या तुद् के तुल्य रूप चलेंगे।

(३५) लिख् (लिखना) (दे० अ० ६)

सूचना—लट्, लोट्, लङ् और विधिलिङ् में लिख् को गुण नहीं होगा। भू या तुद् के तुल्य रूप चलेंगे।

	लट्				लट्	
पृच्छति	पृच्छतः	पृच्छन्ति	प्र०	लिखति	लिखतः	लिखन्ति
पृच्छसि	पृच्छथः	पृच्छथ	म०	लिखसि	लिखथः	लिखथ
पृच्छामि	पृच्छावः	पृच्छामः	उ०	लिखामि	लिखावः	लिखामः
	लोट्				**लोट्**	
पृच्छतु	पृच्छताम्	पृच्छन्तु	प्र०	लिखतु	लिखताम्	लिखन्तु
पृच्छ	पृच्छतम्	पृच्छत	म०	लिख	लिखतम्	लिखत
पृच्छानि	पृच्छाव	पृच्छाम	उ०	लिखानि	लिखाव	लिखाम
	लङ्				**लङ्**	
अपृच्छत्	अपृच्छताम्	अपृच्छन्	प्र०	अलिखत्	अलिखताम्	अलिखन्
अपृच्छः	अपृच्छतम्	अपृच्छत	म०	अलिखः	अलिखतम्	अलिखत
अपृच्छम्	अपृच्छाव	अपृच्छाम	उ०	अलिखम्	अलिखाव	अलिखाम
	विधिलिङ्				**विधिलिङ्**	
पृच्छेत्	पृच्छेताम्	पृच्छेयुः	प्र०	लिखेत्	लिखेताम्	लिखेयुः
पृच्छेः	पृच्छेतम्	पृच्छेत	म०	लिखेः	लिखेतम्	लिखेत
पृच्छेयम्	पृच्छेव	पृच्छेम	उ०	लिखेयम्	लिखेव	लिखेम
	लृट्				**लृट्**	
प्रक्ष्यति	प्रक्ष्यतः	प्रक्ष्यन्ति	प्र०	लेखिष्यति	लेखिष्यतः	लेखिष्यन्ति
प्रक्ष्यसि	प्रक्ष्यथः	प्रक्ष्यथ	म०	लेखिष्यसि	लेखिष्यथः	लेखिष्यथ
प्रक्ष्यामि	प्रक्ष्यावः	प्रक्ष्यामः	उ०	लेखिष्यामि	लेखिष्यावः	लेखिष्यामः

(३६) कृ (करना)(दे० अ० १२-१३)(३७) क्री (खरीदना) (दे० अ० २८-२९)
(केवल परस्मैपद के रूप यहाँ दिये हैं।) (केवल परस्मैपद के रूप यहाँ दिये हैं।)

	तनादिगण-लट्				क्र्यादिगण-लट्	
करोति	कुरुत:	कुर्वन्ति	प्र०	क्रीणाति	क्रीणीत:	क्रीणन्ति
करोषि	कुरुथ:	कुरुथ	म०	क्रीणासि	क्रीणीथ:	क्रीणीथ
करोमि	कुर्व:	कुर्म:	उ०	क्रीणामि	क्रीणीव:	क्रीणीम:
	लोट्				लोट्	
करोतु	कुरुताम्	कुर्वन्तु	प्र०	क्रीणातु	क्रीणीताम्	क्रीणन्तु
कुरु	कुरुतम्	कुरुत	म०	क्रीणीहि	क्रीणीतम्	क्रीणीत
करवाणि	करवाव	करवाम	उ०	क्रीणानि	क्रीणाव	क्रीणाम
	लङ्				लङ्	
अकरोत्	अकुरुताम्	अकुर्वन्	प्र०	अक्रीणात्	अक्रीणीताम्	अक्रीणन्
अकरो:	अकुरुतम्	अकुरुत	म०	अक्रीणा:	अक्रीणीतम्	अक्रीणीत
अकरवम्	अकुर्व	अकुर्म	उ०	अक्रीणाम्	अक्रीणीव	अक्रीणीम
	विधिलिङ्				विधिलिङ्	
कुर्यात्	कुर्याताम्	कुर्यु:	प्र०	क्रीणीयात्	क्रीणीयाताम्	क्रीणीयु:
कुर्या:	कुर्यातम्	कुर्यात	म०	क्रीणीया:	क्रीणीयातम्	क्रीणीयात
कुर्याम्	कुर्याव	कुर्याम	उ०	क्रीणीयाम्	क्रीणीयाव	क्रीणीयाम
	लृट्				लृट्	
करिष्यति	करिष्यत:	करिष्यन्ति	प्र०	क्रेष्यति	क्रेष्यत:	क्रेष्यन्ति
करिष्यसि	करिष्यथ:	करिष्यथ	म०	क्रेष्यसि	क्रेष्यथ:	क्रेष्यथ
करिष्यामि	करिष्याव:	करिष्याम:	उ०	क्रेष्यामि	क्रेष्याव:	क्रेष्याम:

(३८) ज्ञा (जानना) (दे० अ० २८-२९) **(३९) ग्रह् (लेना) (दे० अ० २८-२९)**

सूचना—लट्, लोट्, लङ्, विधिलिङ् में ज्ञा को 'जा' हो जाता है। क्री के तुल्य रूप चलेंगे

सूचना—लट्, लोट्, लङ्, विधिलिङ् में ग्रह् को गृह् हो जाता है। क्री के तुल्य रूप चलेंगे।

	लट्				लट्	
जानाति	जानीतः	जानन्ति	प्र०	गृह्णाति	गृह्णीतः	गृह्णन्ति
जानासि	जानीथः	जानीथ	म०	गृह्णासि	गृह्णीथः	गृह्णीथ
जानामि	जानीवः	जानीमः	उ०	गृह्णामि	गृह्णीवः	गृह्णीमः
	लोट्				लोट्	
जानातु	जानीताम्	जानन्तु	प्र०	गृह्णातु	गृह्णीताम्	गृह्णन्तु
जानीहि	जानीतम्	जानीत	म०	गृहाण	गृह्णीतम्	गृह्णीत
जानानि	जानाव	जानाम	उ०	गृह्णानि	गृह्णाव	गृह्णाम
	लङ्				लङ्	
अजानात्	अजानीताम्	अजानन्	प्र०	अगृह्णात्	अगृह्णीताम्	अगृह्णन्
अजानाः	अजानीतम्	अजानीत	म०	अगृह्णाः	अगृह्णीतम्	अगृह्णीत
अजानाम्	अजानीव	अजानीम	उ०	अगृह्णाम्	अगृह्णीव	अगृह्णीम
	विधिलिङ्				विधिलिङ्	
जानीयात्	जानीयाताम्	जानीयुः	प्र०	गृह्णीयात्	गृह्णीयाताम्	गृह्णीयुः
जानीयाः	जानीयातम्	जानीयात	म०	गृह्णीयाः	गृह्णीयातम्	गृह्णीयात
जानीयाम्	जानीयाव	जानीयाम	उ०	गृह्णीयाम्	गृह्णीयाव	गृह्णीयाम
	लृट्				लृट्	
ज्ञास्यति	ज्ञास्यतः	ज्ञास्यन्ति	प्र०	ग्रहीष्यति	ग्रहीष्यतः	ग्रहीष्यन्ति
ज्ञास्यसि	ज्ञास्यथः	ज्ञास्यथ	म०	ग्रहीष्यसि	ग्रहीष्यथः	ग्रहीष्यथ
ज्ञास्यामि	ज्ञास्यावः	ज्ञास्यामः	उ०	ग्रहीष्यामि	ग्रहीष्यावः	ग्रहीष्यामः

(४०) चुर् (चुराना) (दे० अ० ७) (४१) चिन्त् (सोचना) (दे० अ० ७)

सूचना—चुर् और चिन्त् के अन्त में अय लगाकर भू के तुल्य रूप चलते हैं। केवल परस्मैद के रूप यहाँ दिये हैं।

	चुरादिगण-लट्				लट्	
चोरयति	चोरयतः	चोरयन्ति	प्र०	चिन्तयति	चिन्तयतः	चिन्तयन्ति
चोरयसि	चोरयथः	चोरयथ	म०	चिन्तयसि	चिन्तयथः	चिन्तयथ
चोरयामि	चोरयावः	चोरयामः	उ०	चिन्तयामि	चिन्तयावः	चिन्तयामः
	लोट्				लोट्	
चोरयतु	चोरयताम्	चोरयन्तु	प्र०	चिन्तयतु	चिन्तयताम्	चिन्तयन्तु
चोरय	चोरयतम्	चोरयत	म०	चिन्तय	चिन्तयतम्	चिन्तयत
चोरयाणि	चोरयाव	चोरयाम	उ०	चिन्तयानि	चिन्तयाव	चिन्तयाम
	लङ्				लङ्	
अचोरयत्	अचोरयताम्	अचोरयन्	प्र०	अचिन्तयत्	अचिन्तयताम्	अचिन्तयन्
अचोरयः	अचोरयतम्	अचोरयत	म०	अचिन्तयः	अचिन्तयतम्	अचिन्तयत
अचोरयम्	अचोरयाव	अचोरयाम	उ०	अचिन्तयम्	अचिन्तयाव	अचिन्तयाम
	विधिलिङ्				विधिलिङ्	
चोरयेत्	चोरयेताम्	चोरयेयुः	प्र०	चिन्तयेत्	चिन्तयेताम्	चिन्तयेयुः
चोरयेः	चोरयेतम्	चोरयेत	म०	चिन्तयेः	चिन्तयेतम्	चिन्तयेत
चोरयेयम्	चोरयेव	चोरयेम	उ०	चिन्तयेयम्	चिन्तयेव	चिन्तयेम
	लृट्				लृट्	
चोरयिष्यति	चोरयिष्यतः	चोरयिष्यन्ति		चिन्तयिष्यति	चिन्तयिष्यतः	चिन्तयिष्यन्ति
चोरयिष्यसि	चोरयिष्यथः	चोरयिष्यथ		चिन्तयिष्यसि	चिन्तयिष्यथः	चिन्तयिष्यथ
चोरयिष्यामि	चोरयिष्यावः	चोरयिष्यामः		चिन्तयिष्यामि	चिन्तयिष्यावः	चिन्तयिष्यामः

(४२) कथ् (कहना) (दे० अ० ७) **(४३) भक्ष्** (खाना) (दे० अ० ७)

सूचना— कथ् और भक्ष् के अन्त में 'अय' लगाकर भू या चुर् के तुल्य रूप चलते हैं। केवल परस्मैपद के रूप यहाँ दिये हैं।

	लट्				लट्	
कथयति	कथयतः	कथयन्ति	प्र०	भक्षयति	भक्षयतः	भक्षयन्ति
कथयसि	कथयथः	कथयथ	म०	भक्षयसि	भक्षयथः	भक्षयथ
कथयामि	कथयावः	कथयामः	उ०	भक्षयामि	भक्षयावः	भक्षयामः
	लोट्				**लोट्**	
कथयतु	कथयताम्	कथयन्तु	प्र०	भक्षयतु	भक्षयताम्	भक्षयन्तु
कथय	कथयतम्	कथयत	म०	भक्षय	भक्षयतम्	भक्षयत
कथयानि	कथयाव	कथयाम	उ०	भक्षयाणि	भक्षयाव	भक्षयाम
	लङ्				**लङ्**	
अकथयत्	अकथयताम्	अकथयन्	प्र०	अभक्षयत्	अभक्षयताम्	अभक्षयन्
अकथयः	अकथयतम्	अकथयत	म०	अभक्षयः	अभक्षयतम्	अभक्षयत
अकथयम्	अकथयाव	अकथयाम	उ०	अभक्षयम्	अभक्षयाव	अभक्षयाम
	विधिलिङ्				**विधिलिङ्**	
कथयेत्	कथयेताम्	कथयेयुः	प्र०	भक्षयेत्	भक्षयेताम्	भक्षयेयुः
कथयेः	कथयेतम्	कथयेत	म०	भक्षयेः	भक्षयेतम्	भक्षयेत
कथयेयम्	कथयेव	कथयेम	उ०	भक्षयेयम्	भक्षयेव	भक्षयेम
	लृट्				**लृट्**	
कथयिष्यति	कथयिष्यतः	कथयिष्यन्ति	प्र०	भक्षयिष्यति	भक्षयिष्यतः	भक्षयिष्यन्ति
कथयिष्यसि	कथयिष्यथः	कथयिष्यथ	म०	भक्षयिष्यसि	भक्षयिष्यथः	भक्षयिष्यथ
कथयिष्यामि	कथयिष्यावः	कथयिष्यामः	उ०	भक्षयिष्यामि	भक्षयिष्यावः	भक्षयिष्यामः

धातुरूप-संग्रह (ख)

भ्वादिगण				अदादिगण		
(४४) वस् (रहना) (भू के तुल्य)				(४५) अद् (खाना) परस्मैपद		
	लट्				लट्	
वसति	वसतः	वसन्ति	प्र०	अत्ति	अत्तः	अदन्ति
वससि	वसथः	वसथ	म०	अत्सि	अत्थः	अत्थ
वसामि	वसावः	वसामः	उ०	अद्मि	अद्वः	अद्मः
	लोट्				लोट्	
वसतु	वसताम्	वसन्तु	प्र०	अत्तु	अत्ताम्	अदन्तु
वस	वसतम्	वसत	म०	अद्धि	अत्तम्	अत्त
वसानि	वसाव	वसाम	उ०	अदानि	अदानि	अदाम
	लङ्				लङ्	
अवसत्	अवसताम्	अवसन्	प्र०	आदत्	आत्ताम्	आदन्
अवसः	अवसतम्	अवसत	म०	आदः	आत्तम्	आत्त
अवसम्	अवसाव	अवसाम	उ०	आदम्	आद्व	आद्म
	विधिलिङ्				विधिलिङ्	
वसेत्	वसेताम्	वसेयुः	प्र०	अद्यात्	अद्याताम्	अद्युः
वसेः	वसेतम्	वसेत	म०	अद्याः	अद्यातम्	अद्यात
वसेयम्	वसेव	वसेम	उ०	अद्याम्	अद्याव	अद्याम
	लृट्				लृट्	
वत्स्यति	वत्स्यतः	वत्स्यन्ति	प्र०	अत्स्यति	अत्स्यतः	अत्स्यन्ति
वत्स्यसि	वत्स्यथः	वत्स्यथ	म०	अत्स्यसि	अत्स्यथः	अत्स्यथ
वत्स्यामि	वत्स्यावः	वत्स्यामः	उ०	अत्स्यामि	अत्स्यावः	अत्स्यामः

(४६) ब्रू (कहना)

सूचना— दोनों पदों में लृट् में ब्रू को 'वच्' हो जाता है।

परस्मैपद				आत्मनेपद		
	लट्				**लट्**	
ब्रवीति आह	ब्रूतः आहतुः	ब्रुवन्ति आहुः	प्र०	ब्रूते	ब्रुवाते	ब्रुवते
ब्रवीषि आत्थ	ब्रूथः आहतुः	ब्रूथ	म०	ब्रूषे	ब्रुवाथे	ब्रूध्वे
ब्रवीमि	ब्रूवः	ब्रूमः	उ०	ब्रुवे	ब्रूवहे	ब्रूमहे
	लोट्				**लोट्**	
ब्रवीतु	ब्रूताम्	ब्रुवन्तु	प्र०	ब्रूताम्	ब्रुवाताम्	ब्रुवताम्
ब्रूहि	ब्रूतम्	ब्रूत	म०	ब्रूष्व	ब्रुवाथाम्	ब्रूध्वम्
ब्रवाणि	ब्रवाव	ब्रवाम	उ०	ब्रवै	ब्रवावहै	ब्रवामहै
	लङ्				**लङ्**	
अब्रवीत्	अब्रूताम्	अब्रुवन्	प्र०	अब्रूत	अब्रुवाताम्	अब्रुवत
अब्रवीः	अब्रूतम्	अब्रूत	म०	अब्रूथाः	अब्रुवाथाम्	अब्रूध्वम्
अब्रवम्	अब्रूव	अब्रूम	उ०	अब्रुवि	अब्रूवहि	अब्रूमहि
	विधिलिङ्				**विधिलिङ्**	
ब्रूयात्	ब्रूयाताम्	ब्रूयुः	प्र०	ब्रुवीत	ब्रुवीयाताम्	ब्रुवीरन्
ब्रूयाः	ब्रूयातम्	ब्रूयात	म०	ब्रुवीथाः	ब्रुवीयाथाम्	ब्रुवीध्वम्
ब्रूयाम्	ब्रूयाव	ब्रूयाम	उ०	ब्रुवीय	ब्रुवीवहि	ब्रुवीमहि
	लृट् (ब्रू को वच्)				**लृट् (ब्रू को वच्)**	
वक्ष्यति	वक्ष्यतः	वक्ष्यन्ति	प्र०	वक्ष्यते	वक्ष्येते	वक्ष्यन्ते
वक्ष्यसि	वक्ष्यथः	वक्ष्यथ	म०	वक्ष्यसे	वक्ष्येथे	वक्ष्यध्वे
वक्ष्यामि	वक्ष्यावः	वक्ष्यामः	उ०	वक्ष्ये	वक्ष्यावहे	वक्ष्यामहे

(४७) दुह् (दुहना) परस्मैपद

सूचना— धातु उभयपदी है। यहाँ केवल परस्मैपद के रूप दिये गये हैं।

(४८) रुद् (रोना) परस्मैपद

	दुह्			रुद्		
	लट्				लट्	
दोग्धि	दुग्धः	दुहन्ति	प्र०	रोदिति	रुदितः	रुदन्ति
धोक्षि	दुग्धः	दुग्ध	म०	रोदिषि	रुदिथः	रुदिथ
दोह्मि	दुह्वः	दुह्मः	उ०	रोदिमि	रुदिवः	रुदिमः
	लोट्				लोट्	
दोग्धु	दुग्धाम्	दुहन्तु	प्र०	रोदितु	रुदिताम्	रुदन्तु
दुग्धि	दुग्धम्	दुग्ध	म०	रुदिहि	रुदितम्	रुदित
दोहानि	दोहाव	दोहाम	उ०	रोदानि	रोदाव	रोदाम
	लङ्				लङ्	
अधोक्	अदुग्धाम्	अदुहन्	प्र०	अरोदीत्, अरोदत्	अरुदिताम्	अरुदन्
अधोक्	अदुग्धम्	अदुग्ध	म०	अरोदीः, अरोदः	अरुदितम्	अरुदित
अदोहम्	अदुह्व	अदुह्म	उ०	अरोदम्	अरुदिव	अरुदिम
	विधिलिङ्				विधिलिङ्	
दुह्यात्	दुह्याताम्	दुह्युः	प्र०	रुद्यात्	रुद्याताम्	रुद्युः
दुह्याः	दुह्यातम्	दुह्यात	म०	रुद्याः	रुद्यातम्	रुद्यात
दुह्याम्	दुह्याव	दुह्याम	उ०	रुद्याम्	रुद्याव	रुद्याम
	लृट्				लृट्	
धोक्ष्यति	धोक्ष्यतः	धोक्ष्यन्ति	प्र०	रोदिष्यति	रोदिष्यतः	रोदिष्यन्ति
धोक्ष्यसि	धोक्ष्यथः	धोक्ष्यथ	म०	रोदिष्यसि	रोदिष्यथः	रोदिष्यथ
धोक्ष्यामि	धोक्ष्यावः	धोक्ष्यामः	उ०	रोदिष्यामि	रोदिष्यावः	रोदिष्यामः

(४९) स्वप् (सोना) परस्मैपद — (५०) हन् (मारना) परस्मैपद

	स्वप्			हन्		
	लट्				लट्	
स्वपिति	स्वपितः	स्वपन्ति	प्र०	हन्ति	हतः	घ्नन्ति
स्वपिषि	स्वपिथः	स्वपिथ	म०	हन्सि	हथः	हथ
स्वपिमि	स्वपिवः	स्वपिमः	उ०	हन्मि	हन्वः	हन्मः
	लोट्				लोट्	
स्वपितु	स्वपिताम्	स्वपन्तु	प्र०	हन्तु	हताम्	घ्नन्तु
स्वपिहि	स्वपितम्	स्वपित	म०	जहि	हतम्	हत
स्वपानि	स्वपाव	स्वपाम	उ०	हनानि	हनाव	हनाम
	लङ्				लङ्	
अस्वपीत्, अस्वपत्	अस्वपिताम्	अस्वपन्	प्र०	अहन्	अहताम्	अघ्नन्
अस्वपीः, अस्वपः	अस्वपितम्	अस्वपित	म०	अहः	अहतम्	अहत
अस्वपम्	अस्वपिव	अस्वपिम	उ०	अहनम्	अहन्व	अहन्म
	विधिलिङ्				विधिलिङ्	
स्वप्यात्	स्वप्याताम्	स्वप्युः	प्र०	हन्यात्	हन्याताम्	हन्युः
स्वप्याः	स्वप्यातम्	स्वप्यात	म०	हन्याः	हन्यातम्	हन्यात
स्वप्याम्	स्वप्याव	स्वप्याम	उ०	हन्याम्	हन्याव	हन्याम
	लृट्				लृट्	
स्वप्स्यति	स्वप्स्यतः	स्वप्स्यन्ति	प्र०	हनिष्यति	हनिष्यतः	हनिष्यन्ति
स्वप्स्यसि	स्वप्स्यथः	स्वप्स्यथ	म०	हनिष्यसि	हनिष्यथः	हनिष्यथ
स्वप्स्यामि	स्वप्स्यावः	स्वप्स्यामः	उ०	हनिष्यामि	हनिष्यावः	हनिष्यामः

(५१) इ (जाना) परस्मैपद				(५२) आस् (बैठना) आत्मनेपद		
	लट्				लट्	
एति	इतः	यन्ति	प्र०	आस्ते	आसाते	आसते
एषि	इथः	इथ	म०	आस्से	आसाथे	आध्वे
एमि	इवः	इमः	उ०	आसे	आस्वहे	आस्महे
	लोट्				लोट्	
एतु	इताम्	यन्तु	प्र०	आस्ताम्	आसाताम्	आसताम्
इहि	इतम्	इत	म०	आस्स्व	आसाथाम्	आध्वम्
अयानि	अयाव	अयाम	उ०	आसै	आसावहै	आसामहै
	लङ्				लङ्	
ऐत्	ऐताम्	आयन्	प्र०	आस्त	आसाताम्	आसत
ऐः	ऐतम्	ऐत	म०	आस्थाः	आसाथाम्	आध्वम्
आयम्	ऐव	ऐम	उ०	आसि	आस्वहि	आस्महि
	विधिलिङ्				विधिलिङ्	
इयात्	इयाताम्	इयुः	प्र०	आसीत	आसीयाताम्	आसीरन्
इयाः	इयातम्	इयात	म०	आसीथाः	आसीयाथाम्	आसीध्वम्
इयाम्	इयाव	इयाम	उ०	आसीय	आसीवहि	आसीमहि
	लृट्				लृट्	
एष्यति	एष्यतः	एष्यन्ति	प्र०	आसिष्यते	आसिष्येते	आसिष्यन्ते
एष्यसि	एष्यथः	एष्यथ	म०	आसिष्यसे	आसिष्येथे	आसिष्यध्वे
एष्यामि	एष्यावः	एष्यामः	उ०	आसिष्ये	आसिष्यावहे	आसिष्यामहे

(५३) शी (सोना) — **अदादिगण। आत्मनेपद**

(५४) हु (हवन करना) — **जुहोत्यादिगण। परस्मैपद**

	लट्				लट्	
शेते	शयाते	शेरते	प्र०	जुहोति	जुहुतः	जुह्वति
शेषे	शयाथे	शेध्वे	म०	जुहोषि	जुहुथः	जुहुथ
शये	शेवहे	शेमहे	उ०	जुहोमि	जुहुवः	जुहुमः
	लोट्				लोट्	
शेताम्	शयाताम्	शेरताम्	प्र०	जुहोतु	जुहुताम्	जुह्वतु
शेष्व	शयाथाम्	शेध्वम्	म०	जुहुधि	जुहुतम्	जुहुत
शयै	शयावहै	शयामहै	उ०	जुहवानि	जुहवाव	जुहवाम
	लङ्				लङ्	
अशेत	अशयाताम्	अशेरत	प्र०	अजुहोत्	अजुहुताम्	अजुहवुः
अशेथाः	अशयाथाम्	अशेध्वम्	म०	अजुहोः	अजुहुतम्	अजुहुत
अशयि	अशेवहि	अशेमहि	उ०	अजुहवम्	अजुहुव	अजुहुम
	विधिलिङ्				विधिलिङ्	
शयीत	शयीयाताम्	शयीरन्	प्र०	जुहुयात्	जुहुयाताम्	जुहुयुः
शयीथाः	शयीयाथाम्	शयीध्वम्	म०	जुहुयाः	जुहुयातम्	जुहुयात
शयीय	शयीवहि	शयीमहि	उ०	जुहुयाम्	जुहुयाव	जुहुयाम
	लृट्				लृट्	
शयिष्यते	शयिष्येते	शयिष्यन्ते	प्र०	होष्यति	होष्यतः	होष्यन्ति
शयिष्यसे	शयिष्येये	शयिष्यध्वे	म०	होष्यसि	होष्यथः	होष्यथ
शयिष्ये	शयिष्यावहे	शयिष्यामहे	उ०	होष्यामि	होष्यावः	होष्यामः

(५५) भी (डरना) परस्मैपद (५६) दा (देना) आत्मनेपद

सूचना— परस्मैपद के रूप, देखो पृष्ठ ९५

	लट्				लट्	
बिभेति	बिभीतः	बिभ्यति	प्र०	दत्ते	ददाते	ददते
बिभेषि	बिभीथः	बिभीथ	म०	दत्से	ददाथे	दद्ध्वे
बिभेमि	बिभीवः	बिभीमः	उ०	ददे	दद्वहे	दद्महे
	लोट्				लोट्	
बिभेतु	बिभीताम्	बिभ्यतु	प्र०	दत्ताम्	ददाताम्	ददताम्
बिभीहि	बिभीतम्	बिभीत	म०	दत्स्व	ददाथाम्	दद्ध्वम्
बिभयानि	बिभयाव	बिभयाम	उ०	ददै	ददावहै	ददामहै
	लङ्				लङ्	
अबिभेत्	अबिभीताम्	अबिभयुः	प्र०	अदत्त	अददाताम्	अददत
अबिभेः	अबिभीतम्	अबिभीत	म०	अदत्थाः	अददाथाम्	अदद्ध्वम्
अबिभयम्	अबिभीव	अबिभीम	उ०	अददि	अदद्वहि	अदद्महि
	विधिलिङ्				विधिलिङ्	
बिभीयात्	बिभीयाताम्	बिभीयुः	प्र०	ददीत	ददीयाताम्	ददीरन्
बिभीयाः	बिभीयातम्	बिभीयात	म०	ददीथाः	ददीयाथाम्	ददीध्वम्
बिभीयाम्	बिभीयाव	बिभीयाम	उ०	ददीय	ददीवहि	ददीमहि
	लृट्				लृट्	
भेष्यति	भेष्यतः	भेष्यन्ति	प्र०	दास्यते	दास्येते	दास्यन्ते
भेष्यसि	भेष्यथः	भेष्यथ	म०	दास्यसे	दास्येथे	दास्यध्वे
भेष्यामि	भेष्यावः	भेष्यामः	उ०	दास्ये	दास्यावहे	दास्यामहे

(५७) धा (धारण करना)

जुहोत्यादिगण। उभयपदी

	लट्-परस्मैपद				लट्-आत्मनेपद	
दधाति	धत्तः	दधति	प्र०	धत्ते	दधाते	दधते
दधासि	धत्थः	धत्थ	म०	धत्से	दधाथे	दद्ध्वे
दधामि	दध्वः	दध्मः	उ०	दधे	दध्वहे	दध्महे
	लोट्				लोट्	
दधातु	धत्ताम्	दधतु	प्र०	धत्ताम्	दधाताम्	दधताम्
धेहि	धत्तम्	धत्त	म०	धत्स्व	दधाथाम्	धद्ध्वम्
दधानि	दधाव	दधाम	उ०	दधै	दधावहै	दधामहै
	लङ्				लङ्	
अदधात्	अधत्ताम्	अदधुः	प्र०	अधत्त	अदधाताम्	अदधत
अदधाः	अधत्तम्	अधत्त	म०	अधत्थाः	अदधाथाम्	अधद्ध्वम्
अदधाम्	अदध्व	अदध्म	उ०	अदधि	अदध्वहि	अदध्महि
	विधिलिङ्				विधिलिङ्	
दध्यात्	दध्याताम्	दध्युः	प्र०	दधीत	दधीयाताम्	दधीरन्
दध्याः	दध्यातम्	दध्यात	म०	दधीथाः	दधीयाथाम्	दधीध्वम्
दध्याम्	दध्याव	दध्याम	उ०	दधीय	दधीवहि	दधीमहि
	लृट्				लृट्	
धास्यति	धास्यतः	धास्यन्ति	प्र०	धास्यते	धास्येते	धास्यन्ते
धास्यसि	धास्यथः	धास्यथ	म०	धास्यसे	धास्येथे	धास्यध्वे
धास्यामि	धास्यावः	धास्यामः	उ०	धास्ये	धास्यावहे	धास्यामहे

(५८) युध् (लड़ना) आत्मनेपद

(५९) जन् (उत्पन्न होना) आत्मनेपद

सूचना—लट्, लोट्, लङ्, विधिलिङ् में जन् को जा होता है।

लट्				लट् (जन् को जा)		
युध्यते	युध्येते	युध्यन्ते	प्र०	जायते	जायेते	जायन्ते
युध्यसे	युध्येथे	युध्यध्वे	म०	जायसे	जायेथे	जायध्वे
युध्ये	युध्यावहे	युध्यामहे	उ०	जाये	जायावहे	जायामहे
लोट्				लोट् (जन् को जा)		
युध्यताम्	युध्येताम्	युध्यन्ताम्	प्र०	जायताम्	जायेताम्	जायन्ताम्
युध्यस्व	युध्येथाम्	युध्यध्वम्	म०	जायस्व	जायेथाम्	जायध्वम्
युध्यै	युध्यावहै	युध्यामहै	उ०	जायै	जायावहै	जायामहै
लङ्				लङ् (जन् को जा)		
अयुध्यत	अयुध्येताम्	अयुध्यन्त	प्र०	अजायत	अजायेताम्	अजायन्त
अयुध्यथाः	अयुध्येथाम्	अयुध्यध्वम्	म०	अजायथाः	अजायेथाम्	अजायध्वम्
अयुध्ये	अयुध्यावहि	अयुध्यामहि	उ०	अजाये	अजायावहि	अजायामहि
विधिलिङ्				विधिलिङ् (जन् को जा)		
युध्येत	युध्येयाताम्	युध्येरन्	प्र०	जायेत	जायेयाताम्	जायेरन्
युध्येथाः	युध्येयाथाम्	युध्येध्वम्	म०	जायेथाः	जायेयाथाम्	जायेध्वम्
युध्येय	युध्येवहि	युध्येमहि	उ०	जायेय	जायेवहि	जायेमहि
लृट्				लृट्		
योत्स्यते	योत्स्येते	योत्स्यन्ते	प्र०	जनिष्यते	जनिष्येते	जनिष्यन्ते
योत्स्यसे	योत्स्येथे	योत्स्यध्वे	म०	जनिष्यसे	जनिष्येथे	जनिष्यध्वे
योत्स्ये	योत्स्यावहे	योत्स्यामहे	उ०	जनिष्ये	जनिष्यावहे	जनिष्यामहे

(६०) सु (स्नान करना या कराना, रस निकालना)

स्वादिगण। उभयपदी

लट्-परस्मैपद				लट्-आत्मनेपद		
सुनोति	सुनुतः	सुन्वन्ति	प्र०	सुनुते	सुन्वान्ते	सुन्वते
सुनोषि	सुनुथः	सुनुथ	म०	सुनुषे	सुन्वाथे	सुनुध्वे
सुनोमि	सुनुवः / सुन्वः	सुनुमः / सुन्मः	उ०	सुन्वे	सुनुवहे / सुन्वहे	सुनुमहे / सुन्महे

लोट्				लोट्		
सुनोतु	सुनुताम्	सुन्वन्तु	प्र०	सुनुताम्	सुन्वाताम्	सुन्वताम्
सुनु	सुनुतम्	सुनुत	म०	सुनुष्व	सुन्वाथाम्	सुनुध्वम्
सुनवानि	सुनवाव	सुनवाम	उ०	सुनवै	सुनवावहै	सुनवामहै

लङ्				लङ्		
असुनोत्	असुनुताम्	असुन्वन्	प्र०	असुनुत	असुन्वाताम्	असुन्वत
असुनोः	असुनुतम्	असुनुत	म०	असुनुथाः	असुन्वाथाम्	असुनुध्वम्
असुनवम्	असुनुव	असुनुम	उ०	असुन्वि	असुनुवहि / असुन्वहि	असुनुमहि / असुन्महि

विधिलिङ्				विधिलिङ्		
सुनुयात्	सुनुयाताम्	सुनुयुः	प्र०	सुन्वीत	सुन्वीयाताम्	सुन्वीरन्
सुनुयाः	सुनुयातम्	सुनुयात	म०	सुन्वीथाः	सुन्वीयाथाम्	सुन्वीध्वम्
सुनुयाम्	सुनुयाव	सुनुयाम	उ०	सुन्वीय	सुन्वीवहि	सुन्वीमहि

लृट्				लृट्		
सोष्यति	सोष्यतः	सोष्यन्ति	प्र०	सोष्यते	सोष्येते	सोष्यन्ते
सोष्यसि	सोष्यथः	सोष्यथ	म०	सोष्यसे	सोष्येथे	सोष्यध्वे
सोष्यामि	सोष्यावः	सोष्यामः	उ०	सोष्ये	सोष्यावहे	सोष्यामहे

(६१) स्पृश् (छूना) परस्मैपद

(६२) मृ (मरना) आत्मनेपद

सूचना- लृट् में मृ धातु परस्मैपदी होती है।

लट्				लट्		
स्पृशति	स्पृशतः	स्पृशन्ति	प्र०	म्रियते	म्रियेते	म्रियन्ते
स्पृशसि	स्पृशथः	स्पृशथ	म०	म्रियसे	म्रियेथे	म्रियध्वे
स्पृशामि	स्पृशावः	स्पृशामः	उ०	म्रिये	म्रियावहे	म्रियामहे

लोट्				लोट्		
स्पृशतु	स्पृशताम्	स्पृशन्तु	प्र०	म्रियताम्	म्रियेताम्	म्रियन्ताम्
स्पृश	स्पृशतम्	स्पृशत	म०	म्रियस्व	म्रियेथाम्	म्रियध्वम्
स्पृशानि	स्पृशाव	स्पृशाम	उ०	म्रिये	म्रियावहै	म्रियामहै

.२				लङ्		
अस्पृशत्	अस्पृशताम्	अस्पृशन्	प्र०	अम्रियत	अम्रियेताम्	अम्रियन्त
अस्पृशः	अस्पृशतम्	अस्पृशत	म०	अम्रियथाः	अम्रियेथाम्	अम्रियध्वम्
अस्पृशम्	अस्पृशाव	अस्पृशाम	उ०	अम्रिये	अम्रियावहि	अम्रियामहि

विधिलिङ्				विधिलिङ्		
स्पृशेत्	स्पृशेताम्	स्पृशेयुः	प्र०	म्रियेत	म्रियेयाताम्	म्रियेरन्
स्पृशेः	स्पृशेताम्	स्पृशेत	म०	म्रियेथाः	म्रियेयाथाम्	म्रियेध्वम्
स्पृशेयम्	स्पृशेव	स्पृशेम	उ०	म्रियेय	म्रियेवहि	म्रियेमहि

	लृट्				लृट्		
(क)	स्प्रक्ष्यति	स्प्रक्ष्यतः	स्प्रक्ष्यन्ति	प्र०	मरिष्यति	मरिष्यतः	मरिष्यन्ति
	स्प्रक्ष्यसि	स्प्रक्ष्यथः	स्प्रक्ष्यथ	म०	मरिष्यसि	मरिष्यथः	मरिष्यथ
	स्प्रक्ष्यामि	स्प्रक्ष्यावः	स्प्रक्ष्यामः	उ०	मरिष्यामि	मरिष्यावः	मरिष्यामः
(ख)	स्पर्क्ष्यति	स्पर्क्ष्यतः	स्पर्क्ष्यन्ति	प्र०			
	स्पर्क्ष्यसि	स्पर्क्ष्यथः	स्पर्क्ष्यथ	म०			
	स्पर्क्ष्यामि	स्पर्क्ष्यावः	स्पर्क्ष्यामः	उ०			

(६३) मुच् (छोड़ना) तुदादिगण। उभयपद

(६४) रुध् (रोकना, ढकना) रुधादिगण। उभयपद

मुच्				रुध्		
	लट्–परस्मैपद				लट्–परस्मैपद	
मुञ्चति	मुञ्चतः	मुञ्चन्ति	प्र०	रुणद्धि	रुन्धः	रुन्धन्ति
मुञ्चसि	मुञ्चथः	मुञ्चथ	म०	रुणत्सि	रुन्धः	रुन्ध
मुञ्चामि	मुञ्चावः	मुञ्चामः	उ०	रुणध्मि	रुन्ध्वः	रुन्ध्मः
	लोट्				लोट्	
मुञ्चतु	मुञ्चताम्	मुञ्चन्तु	प्र०	रुणद्धु	रुन्धाम्	रुन्धन्तु
मुञ्च	मुञ्चतम्	मुञ्चत	म०	रुन्धि	रुन्धम्	रुन्ध
मुञ्चानि	मुञ्चाव	मुञ्चाम	उ०	रुणधानि	रुणधाव	रुणधाम
	लङ्				लङ्	
अमुञ्चत्	अमुञ्चताम्	अमुञ्चन्	प्र०	अरुणत्	अरुन्धाम्	अरुन्धन्
अमुञ्चः	अमुञ्चतम्	अमुञ्चत	म०	अरुणः	अरुन्धम्	अरुन्ध
अमुञ्चम्	अमुञ्चाव	अमुञ्चाम	उ०	अरुणधम्	अरुन्ध्व	अरुन्ध्म
	विधिलिङ				विधिलिङ्	
मुञ्चेत्	मुञ्चेताम्	मुञ्चेयुः	प्र०	रुन्ध्यात्	रुन्ध्याताम्	रुन्ध्युः
मुञ्चेः	मुञ्चेतम्	मुञ्चेत	म०	रुन्ध्याः	रुन्ध्यातम्	रुन्ध्यात
मुञ्चेयम्	मुञ्चेव	मुञ्चेम	उ०	रुन्ध्याम्	रुन्ध्याव	रुन्ध्याम
	लृट्				लृट्	
मोक्ष्यति	मोक्ष्यतः	मोक्ष्यन्ति	प्र०	रोत्स्यति	रोत्स्यतः	रोत्स्यन्ति
मोक्ष्यसि	मोक्ष्यथः	मोक्ष्यथ	म०	रोत्स्यसि	रोत्स्यथः	रोत्स्यथ
मोक्ष्यामि	मोक्ष्यावः	मोक्ष्यामः	उ०	रोत्स्यामि	रोत्स्यावः	रोत्स्यामः

सूचना– आत्मनेपद में सेव् के तुल्य रूप चलेंगे। लट्–मुञ्चते, लोट्–मुञ्चताम्, लङ्–अमुञ्चत, विधिलिङ्–मुञ्चेत, लृट्–मोक्ष्यते।

सूचना– आत्मनेपद में रुध् के रूप भुज् (धातु ६५) के तुल्य चलेंगे। लट–रुन्धे, लोट्–रुन्धाम्, लङ्–अरुन्ध, विधिलिङ्–रुन्धीत, लृट्–रोत्स्यते।

(६५) भुज् (१. पालन करना, २. भोजन करना)

सूचना— भुज् धातु पालन करने के अर्थ में परस्मैपदी होती है और भोजन करना, उपभोग करना अर्थ में आत्मनेपदी होती है।

	लट्-परस्मैपद				लट्-आत्मनेपद	
भुनक्ति	भुङ्क्तः	भुञ्जन्ति	प्र०	भुङ्क्ते	भुञ्जाते	भुञ्जते
भुनक्षि	भुङ्क्थः	भुङ्क्थ	म०	भुङ्क्षे	भुञ्जाथे	भुङ्ग्ध्वे
भुनज्मि	भुञ्ज्वः	भुञ्ज्मः	उ०	भुञ्जे	भुञ्ज्वहे	भुञ्ज्महे
	लोट्				लोट्	
भुनक्तु	भुङ्क्ताम्	भुञ्जन्तु	प्र०	भुङ्क्ताम्	भुञ्जाताम्	भुञ्जताम्
भुङ्ग्धि	भुङ्क्तम्	भुङ्क्त	म०	भुङ्क्ष्व	भुञ्जाथाम्	भुङ्ग्ध्वम्
भुनजानि	भुनजाव	भुनजाम	उ०	भुनजै	भुनजावहै	भुनजामहै
	लङ्				लङ्	
अभुनक्	अभुङ्क्ताम्	अभुञ्जन्	प्र०	अभुङ्क्त	अभुञ्जाताम्	अभुञ्जत
अभुनक्	अभुङ्क्तम्	अभुङ्क्त	म०	अभुङ्क्थाः	अभुञ्जाथाम्	अभुङ्ग्ध्वम्
अभुनजम्	अभुञ्ज्व	अभुञ्ज्म	उ०	अभुञ्जि	अभुञ्ज्वहि	अभुञ्ज्महि
	विधिलिङ्				विधिलिङ्	
भुञ्ज्यात्	भुञ्ज्याताम्	भुञ्ज्युः	प्र०	भुञ्जीत	भुञ्जीयाताम्	भुञ्जीरन्
भुञ्ज्याः	भुञ्ज्यातम्	भुञ्ज्यात	म०	भुञ्जीथाः	भुञ्जीयाथाम्	भुञ्जीध्वम्
भुञ्ज्याम्	भुञ्ज्याव	भुञ्ज्याम	उ०	भुञ्जीय	भुञ्जीवहि	भुञ्जीमहि
	लृट्				लृट्	
भोक्ष्यति	भोक्ष्यतः	भोक्ष्यन्ति	प्र०	भोक्ष्यते	भोक्ष्येते	भोक्ष्यन्ते
भोक्ष्यसि	भोक्ष्यथः	भोक्ष्यथ	म०	भोक्ष्यसे	भोक्ष्येथे	भोक्ष्यध्वे
भोक्ष्यामि	भोक्ष्यावः	भोक्ष्यामः	उ०	भोक्ष्ये	भोक्ष्यावहे	भोक्ष्यामहे

(६६) तन् (फैलाना)

तनादिगण। उभयपदी

लट्-परस्मैपद				लट्-आत्मनेपद		
तनोति	तनुतः	तन्वन्ति	प्र०	तनुते	तन्वाते	तन्वते
तनोषि	तनुथः	तनुथ	म०	तनुषे	तन्वाथे	तनुध्वे
तनोमि	तनुवः तन्वः	तनुमः तन्मः	उ०	तन्वे	तनुवहे तन्वहे	तनुमहे तन्महे
लोट्				लोट्		
तनोतु	तनुताम्	तन्वन्तु	प्र०	तनुताम्	तन्वाताम्	तन्वताम्
तनु	तनुतम्	तनुत	म०	तनुष्व	तन्वाथाम्	तनुध्वम्
तनवानि	तनवाव	तनवाम	उ०	तनवै	तनवावहै	तनवामहै
लङ्				लङ्		
अतनोत्	अतनुताम्	अतन्वन्	प्र०	अतनुत	अतन्वाताम्	अतन्वत
अतनोः	अतनुतम्	अतनुत	म०	अतनुथाः	अतन्वाथाम्	अतनुध्वम्
अतनवम्	अतनुव अतन्व	अतनुम अतन्म	उ०	अतन्वि	अतनुवहि अतन्वहि	अतनुमहि अतन्महि
विधिलिङ्				विधिलिङ्		
तनुयात्	तनुयाताम्	तनुयुः	प्र०	तन्वीत	तन्वीयाताम्	तन्वीरन्
तनुयाः	तनुयातम्	तनुयात	म०	तन्वीथाः	तन्वीयाथाम्	तन्वीध्वम्
तनुयाम्	तनुयाव	तनुयाम	उ०	तन्वीय	तन्वीवहि	तन्वीमहि
लृट्				लृट्		
तनिष्यति	तनिष्यतः	तनिष्यन्ति	प्र०	तनिष्यते	तनिष्येते	तनिष्यन्ते
तनिष्यसि	तनिष्यथः	तनिष्यथ	म०	तनिष्यसे	तनिष्येथे	तनिष्यध्वे
तनिष्यामि	तनिष्यावः	तनिष्यामः	उ०	तनिष्ये	तनिष्यावहे	तनिष्यामहे

(४) सन्धि-विचार

(१) यण्-सन्धि (देखो अभ्यास १९)

(इको यणचि) इ ई को य्, उ ऊ को व्, ऋ को र्, ऌ को ल् हो जाता है, यदि बाद में कोई स्वर हो तो। सवर्ण (वैसा ही) स्वर हो तो नहीं। जैसे:-

प्रति+एक:=प्रत्येक:	मधु+अरि:=मध्वरि:	धातृ+अंश:=धात्रंश:
यदि+अपि=यद्यपि	अनु+अय:=अन्वय:	पितृ+आ=पित्रा
इति+आह=इत्याह	वधू+औ=वध्वौ	ऌ+आकृति:=लाकृति:

(२) अयादिसन्धि (देखो अभ्यास २०)

(एचोऽयवायाव:) ए को अय्, ओ को अव्, ऐ को आय्, औ को आव् हो जाता है, बाद में कोई स्वर हो तो। (शब्द के अन्तिम ए या ओ के बाद अ हो तो नहीं।) जैसे:-

हरे+ए=हरये	भो+अनम्=भवनम्	गै+अति=गायति
ने+अनम्=नयनम्	पो+अन:=पवन:	गै+अक:=गायक:
शे+अनम्=शयनम्	श्रो+अणम्=श्रवणम्	भौ+अक:=भावक:
संचे+अ:=संचय:	गुरो+ए=गुरवे	द्वौ+इमौ=द्वाविमौ

(३) गुणसन्धि (देखो अभ्यास २१)

(आद्‌गुण:) (१) अ या आ के बाद इ या ई हो तो दोनों को 'ए' होगा। (२) अ या आ के बाद उ या ऊ हो तो दोनों को 'ओ' होगा। (३) अ या आ के बाद ऋ हो तो दोनों को 'अर्' होगा। (४) अ या आ के बाद ऌ हो तो दोनों को 'अल्' होगा। जैसे:-

महा+ईश:=महेश:	हित+उपदेश:=हितोपदेश:	ब्रह्म+ऋषि:=ब्रह्मर्षि:
महा+ईश्वर:=महेश्वर:	गङ्गा+उदकम्=गङ्गोदकम्	सप्त+ऋषि:=सप्तर्षि:
न+इति=नेति	पश्य+उपरि=पश्योपरि	तव+ऌकार:=तवल्कार:

(४) वृद्धिसन्धि (देखो अभ्यास २२)

(वृद्धिरेचि) (१) अ या आ के बाद ए या ऐ होगा तो दोनों को 'ऐ' होगा। (२) अ य आ के बाद ओ या औ होगा तो दोनों को 'औ' होगा। जैसे:-

अत्र+एष:=अत्रैष:	जल+ओघ:=जलौघ:
पश्य+एतम्=पश्यैतम्	तण्डुल+ओदनम्=तण्डुलौदनम्
न+एतत्=नैतत्	देव+औदार्यम्=देवौदार्यम्
जन+ऐक्यम्=जनैक्यम्	कार्य+औचित्यम्=कार्यौचित्यम्

(५) दीर्घसन्धि (देखो अभ्यास २३)

(अकः सवर्णे दीर्घः) अ इ उ ऋ के बाद कोई सवर्ण (सदृश) अक्षर हो तो दोनों के स्थान पर उसी का दीर्घ अक्षर हो जाता है। अर्थात् (१) अ या आ + अ या आ=आ। (२) इ या ई + इ या ई = ई। (३) उ या ऊ + उ या ऊ = ऊ। (४) ऋ + ऋ = ॠ। जैसे:-

दया + आनन्दः = दयानन्दः	गिरि + ईशः = गिरीशः	भानु + उदयः = भानूदयः
विद्या + आलयः = विद्यालयः	नदी + ईशः नदीशः	होतृ + ऋकारः = होतृकारः

(६) पूर्वरूपसन्धि (देखो अभ्यास २४)

(एङः पदान्तादति) पद (शब्दरूप या धातुरूप) के अन्तिम ए आ ओ के बाद अ हो तो वह हट जाता है। (अ हटा है, इस बात को बताने के लिए ऽ चिह्न लगा दिया जाता है)। जैसे:-

हरे+अव=हरेऽव	विष्णो+अव=विष्णोऽव
सर्वे+अपि=सर्वेऽपि	सो+अपि=सोऽपि

(७) श्चुत्वसन्धि (देखो अभ्यास २५)

(स्तोः श्चुना श्चुः) स् या तवर्ग से पहले या बाद में श् या चवर्ग कोई भी हो तो स् को श् और तवर्ग को चवर्ग हो जाता है। जैसे:-

रामस् + च = रामश्च	सत् + चित् = सच्चित्	सद् + जनः = सज्जनः
हरिस् + शेते = हरिश्शेते	तत् + च = तच्च	शार्ङ्गिन् + जय = शार्ङ्गिञ्जय

(८) ष्टुत्वसन्धि

(ष्टुना ष्टुः) स् या तवर्ग से पहले या बाद में ष् या टवर्ग कोई भी हो तो स् को ष् और तवर्ग को टवर्ग होता है। जैसे:-

इष्+तः=इष्टः	रामस्+षष्ठः=रामष्षष्ठः	विष्+नुः=विष्णुः
दुष्+तः=दुष्टः	उद्+डीनः=उड्डीनः	उष्+त्रः=उष्ट्रः

(९) जश्त्वसन्धि (१)

(झलां जशोऽन्ते) वर्ग के १,२,३,४ (अर्थात् पहले, दूसरे, तीसरे और चौथे वर्ण) को ३ (अपने वर्ग का तीसरा अक्षर) हो जाता है, यदि वह पद (शब्द) का अन्तिम अक्षर हो तो। जैसे:-

जगत्+ईशः=जगदीशः	सुप्+अन्तः=सुबन्तः
सत्+आचारः=सदाचारः	अच्+अन्तः=अजन्तः

(१०) जश्त्वसन्धि (२) (देखो अभ्यास २६)

(झलां जश् जशि) वर्ग के १,२,३,४ (पहले, दूसरे, तीसरे और चौथे वर्ण) को ३ (अपने वर्ग का तीसरा अक्षर) हो जाता है, बाद में वर्ग के ३,४ (तीसरा या चौथा वर्ण) हो तो। (यह नियम पद के बीच में लगता है और नियम ९ पद के अन्त में।) जैसे:-

बुध्+धिः=बुद्धिः	बुध्+धः=बुद्धः	दुघ्+धम्=दुग्धम्
शुध्+धिः=शुद्धिः	युध्+धः=युद्धः	दघ्+धः=दग्धः
ऋध्+धिः=ऋद्धिः	लभ्+धः=लब्धः	क्षुभ्+धः=क्षुब्धः

(११) चर्त्वसन्धि (देखो अभ्यास २७)

(खरि च) वर्ग के १,२,३,४ को १ (उसी वर्ग का प्रथम अक्षर) हो जाता है, बाद में वर्ग के १, २, श ष स कोई हों तो। जैसे:-

सद्+कारः=सत्कारः	सद्+पुत्रः=सत्पुत्रः
उद्+साहः=उत्साहः	तद्+परः=तत्परः

(१२) अनुस्वारसन्धि (देखो अभ्यास १८)

(मोऽनुस्वारः) शब्द के अन्तिम म् के बाद कोई व्यंजन (हल्) हो तो म् को अनुस्वार (ं) हो जाता है। बाद में स्वर हो तो नहीं। जैसे:-

सत्यम्+वद = सत्यं वद	पुस्तकम्+पठति = पुस्तकं पठति
धर्मम्+चर = धर्मं चर	भोजनम्+खादति = भोजनं खादति
कार्यम्+कुरु = कार्यं कुरु	ईश्वरम्+नमति = ईश्वरं नमति

(१३) विसर्गसन्धि (देखो अभ्यास २८)

(विसर्जनीयस्य सः) विसर्ग (:) के बाद वर्ग के १, २, श ष स कोई हों तो विसर्ग को स् हो जाता है। (श् या चवर्ग बाद में हो तो संधि-नियम ७ से स् को श् हो जायगा।) जैसे:-

बालकः+तिष्ठति=बालकस्तिष्ठति	पुत्रः+चलति=पुत्रश्चलति
रामः+तरति=रामस्तरति	हरिः+च=हरिश्च
कः+चित्=कश्चित्	रामः+शेते=रामश्शेते

(१४) रुत्वसन्धि (देखो अभ्यास २९)

(ससजुषो रुः) शब्द के अन्तिम् स् को रु (र्) हो जाता है। **(सूचना-**प्रथमा के एकवचन में इसी र् का विसर्ग रहता है। संधि में यह र् अ और आ के अतिरिक्त अन्य स्वरों के बाद रहता है)। जैसे:-

हरिः+अवदत् = हरिरवदत् | हरेः+एव = हरेरेव
गुरुः+अस्ति = गुरुरस्ति | गुरोः+धनम् = गुरोर्धनम्

(१५) उत्वसन्धि (१) (देखो अभ्यास २९)

(अतो रोरप्लुतादप्लुते) अः को ओ हो जाता है, बाद में अ हो तो। अर्थात् अः + अ = ओऽ। जैसे:-

कः+अपि = कोऽपि | रामः+अवदत् = रामोऽवदत्
रामः+अस्ति = रामोऽस्ति | कः+अयम् = कोऽयम्

(१६) उत्वसन्धि (२) (देखो अभ्यास ३०)

(हशि च) अः को ओ हो जाता है, बाद में वर्ग के ३, ४, ५, ह य व र ल कोई हों तो। जैसे:-

रामः+गच्छति = रामो गच्छति | पुत्रः+वदति = पुत्रो वदति
कृष्णः+लिखति = कृष्णो लिखति | देवः+जयति = देवो जयति
नृपः+जयति = नृपो जयति | नृपः+रक्षति = नृपो रक्षति

(१७) यत्वसन्धि

(भोभगोअघोअपूर्वस्य योऽशि) भोः, भगोः, अघोः शब्द और अ या आ के बाद रु (र् याः) को य् होता है। बाद में कोई स्वर होगा तो य् का लोप विकल्प से होगा। यदि कोई व्यंजन होगा तो य् का लोप अवश्य होगा। जैसे:-

देवाः+गच्छनति = देवा गच्छन्ति | रामः+इच्छति = राम इच्छति
कन्याः+इच्छन्ति = कन्या इच्छन्ति | शिष्याः+एते = शिष्या एते

(१८) सुलोपसन्धि (देखो अभ्यास ३०)

(एतत्तदोः सुलोपोऽकोरनञ् समासे हलि) सः और एषः के विसर्ग का लोप हो जाता है, बाद में कोई व्यंजन हो तो। जैसे:-

सः+गच्छति = स गच्छति | एषः+गच्छति = एष गच्छति
सः+लिखति = स लिखति | एषः वदति = एष वदति

(५) समास-परिचय

(१) अव्ययीभाव

अव्ययीभाव समास की पहचान यह है कि इसका पहला शब्द अव्यय (उपसर्ग या निपात) होता है। बाद का शब्द कोई संज्ञाशब्द होगा। अव्ययीभाव समास वाले शब्द अव्यय होते हैं या नपुंसकलिंग एकवचन होते हैं। इनके रूप प्राय: नहीं चलते हैं। अव्ययीभाव समास के समस्त पद और विग्रह में अन्तर होता है, क्योंकि इसमें किसी विशेष अर्थ में अव्यय का प्रयोग होता है। जैसे-१. सप्तमी के अर्थ में अधि, हरौ-अधिहरि (हरि में)। २. समीप अर्थ में उप, गङ्गायाः समीपम्-उपगङ्गम् (गंगा के समीप)। ३. अभाव अर्थ में निर्, विघ्नानाम् अभावः-निर्विघ्नम् (विघ्नों का अभाव)। ४. पीछे अर्थ में अनु, हरेः पश्चात्-अनुहरि (हरि के पीछे)। ५. प्रत्येक अर्थ में प्रति, गृहं गृहं प्रति-प्रतिगृहम् (प्रत्येक घर में)। ६. अनुसार अर्थ में यथा, शक्तिम् अनतिक्रम्य-यथाशक्ति (शक्ति के अनुसार)।

(२) तत्पुरुष

तत्पुरुष समास उसे कहते हैं, जहाँ पर दो या अधिक शब्दों के बीच में द्वितीया, तृतीया, चतुर्थी, पंचमी, षष्ठी या सप्तमी विभक्ति का लोप होता है। समास होने पर बीच की विभक्ति का लोप हो जायेगा। जिस विभक्ति का लोप होता है, उसी विभक्ति के नाम से वह तत्पुरुष कहा जाता है। जैसे-षष्ठी तत्पुरुष आदि। इसमें बाद वाले शब्द का अर्थ मुख्य होता है। (१) द्वितीया-भयं प्राप्तः-भयप्राप्तः। दुःखम् अतीतः-दुःखातीतः। कृष्णम् श्रितः-कृष्णश्रितः। (२) तृतीया-खड्गेन हतः-खड्गहतः। विद्यया हीनः-विद्याहीनः। ज्ञानेन शून्यः-ज्ञानशून्यः। बाणेन हतः-बाणहतः। (३) चतुर्थी-यूपाय दारु-यूपदारु। स्नानाय अर्थम्-स्नानार्थम्। (४) पंचमी-चोराद् भयम्-चोरभयम्। पापात् मुक्तः-पापमुक्तः। वृक्षात् पतितः-वृक्षपतितः। (५) षष्ठी-राज्ञः पुरुषः-राजपुरुषः। ईश्वरस्य भक्तः-ईश्वरभक्तः। विद्यायाः आलयः-विद्यालयः। देवानाम् आलयः-देवालयः। (६) सप्तमी-शास्त्रे निपुणः-शास्त्रनिपुणः। जले मग्नः-जलमग्नः। कार्ये चतुरः-कार्यचतुरः। युद्धे निपुणः-युद्धनिपुणः।

(३) कर्मधारय

विशेषण और विशेष्य का जो समास होता है, उसे कर्मधारय समास कहते हैं। विशेषण शब्द पहले रहता है, विशेष्य बाद में। इसमें दोनों पदों में एक ही विभक्ति रहती है। नीलम् उत्पलम्-नीलोत्पलम् (नीला कमल)। कृष्णः सर्पः—कृष्णसर्पः (काला साँप)। महान् चासौ आत्मा-महात्मा (महात्मा)। इन अर्थों में भी कर्मधारय होता है-(१) एव (ही) अर्थ में-मुखमेव कमलम्- मुखकमलम् (मुख-कमल)। पादपद्मम् (चरण-कमल)। (२) सुन्दर अर्थ में 'सु' और कुत्सित अर्थ में 'कु' लगता है। सुन्दरः पुरुषः-सुपुरुषः (अच्छा आदमी)। कुत्सितः पुरुषः-कुपुरुषः-(नीच आदमी)। कुपुत्रः (कुपुत्र), कुदेशः (बुरा देश)। (३) इव (तरह) अर्थ में-घन इव श्यामः-घनश्यामः (बादल की तरह काला)। नरः सिंह इव-नरसिंहः (शेर के सदृश व्यक्ति)। चन्द्रसदृशं मुखम्-चन्द्रमुखम् (चन्द्रमा के सदृश मुँह)।

(४) द्विगु

कर्मधारय समास का ही उपभेद द्विगु है। कर्मधारय में प्रथम शब्द संख्यावाचक होगा तो वह द्विगु कहलाता है। यह समास प्रायः समाहार (समूह) अर्थ में होता है। त्रयाणां लोकानां समाहारः-त्रिलोकम् (तीन लोक)। चतुर्युगम् (चार युग)। समाहार में साधारणतया नपुंसकलिंग एकवचन होता है। अकारान्त शब्द स्त्रीलिंग भी हो जाते हैं। त्रिलोकम्-त्रिलोकी, चतुर्युगम्-चतुर्युगी, शताब्दम्-शताब्दी।

(५) नञ् समास

समास का ही एक भेद नञ् समास है। 'नहीं' अर्थ वाले नञ् का दूसरे शब्द के साथ समास होने पर नञ् समास होता है। यदि बाद में व्यंजन होगा तो नञ् का अ शेष रहेगा। स्वर बाद में होगा तो नञ् का अन् शेष रहेगा। न ब्राह्मणः-अब्राह्मणः (ब्राह्मणेतर)। अप्रियः (अप्रिय), अस्वस्थः (अस्वस्थ), अज्ञानम् (अज्ञान)। न उपस्थितः-अनुपस्थितः (अनुपस्थित)। अनुचितः (अनुचित), अनुदारः (कृपण), अनीश्वरवादी (ईश्वर को न माननेवाला)।

(६) बहुव्रीहि

बहुव्रीहि में अन्यपद के अर्थ को प्रधानता होती है। इसमें समास होने पर समस्तपद किसी अन्य पद के विशेषण के रूप में काम करता है। बहुव्रीहि की पहचान है कि अर्थ करने पर जहाँ जिसको, जिसने, जिसका, जिसमें आदि अर्थ निकले। बहुव्रीहि के साधारणतया तीन भेद होते हैं-(१) समानाधिकरण-जहाँ दोनों पदों में प्रथमा विभक्ति रहती है। (क) कर्म—प्राप्तम् उदकं यं सः-प्राप्तोदकः (जिसको जल मिल गया है)। (ख) करण—हताः शत्रवः येन सः-हतशत्रुः (जिसने शत्रुओं को मारा है, ऐसा राजा)। (ग) संप्रदान—दत्तं भोजनं यस्मै सः-दत्तभोजनः (जिसको भोजन दिया गया है, ऐसा भिक्षुक)। (घ) अपादान—पतितं पर्णं यस्मात् सः-पतितपर्णः (जिसके पत्ते गिर गये हैं, ऐसा वृक्ष)। (ङ) सम्बन्ध—दश आननानि यस्य सः—दशाननः (दस मुँहवाला, रावण)। पीताम्बरः (कृष्ण), चतुर्मुखः (ब्रह्मा)। (च) अधिकरण—वीराः पुरुषाः यस्मिन् सः-वीरपुरुषः (वीर पुरुषों वाला, ग्राम)। (२) सहार्थक-साथ अर्थ में बहुव्रीहि। विनयेन सहितम्-सविनयम् (सविनय)। सुपुत्रः, सबान्धवः, सादरम्। (३) व्यधिकरण-दोनों पदों में भिन्न विभक्तियाँ हों। धनुः पाणौ यस्य सः-धनुष्पाणिः (धनुर्धर)।

(७) द्वन्द्व

इसमें दो या अधिक शब्दों का इस प्रकार समास होता है कि उसमें च (और) अर्थ छिपा रहता है। इसमें दोनों पदों का अर्थ मुख्य होता है। द्वन्द्व समास की पहचान है कि जहाँ अर्थ करने पर 'और' अर्थ निकले। इसके साधारणतया तीन भेद होते हैं-(१) इतरेतर—जहाँ बीच में 'और' का अर्थ होता है और शब्दों की संख्या के अनुसार अन्त में वचन होता है। रामश्च कृष्णश्च-रामकृष्णौ (राम और कृष्ण)। पत्रं च पुष्पं च फलं च-पत्रपुष्पफलानि (पत्र, पुष्प और फल), हरिहरौ, रामलक्ष्मणौ, भीमार्जुनौ। (२) समाहार—समूह अर्थ में। इसमें प्रायः नपुंसकलिंग एकवचन अन्त में रहता है। हस्तौ च पादौ च हस्तपादम् (हाथ-पैर)। व्रीहियवम् (जौ-चावल)। शीतोष्णम् (ठंडा-गर्म)। (३) एकशेष—समान आकारवाले शब्दों में से एक शब्द शेष रहता है और अर्थ के अनुसार द्विवचन या बहुवचन होता है। वृक्षश्च वृक्षश्च—वृक्षौ (दो पेड़)।

(६) प्रत्यय-विचार

(१) क्त (२) क्तवतु प्रत्यय (देखो अभ्यास २३, २४, २५)

सूचना—(१) क्त और क्तवतु प्रत्यय भूतकाल में होते हैं। क्त का त और क्तवतु का तवत् शेष रहता है। धातु को गुण या वृद्धि नहीं होती है। संप्रसारण होता है। यहाँ पर केवल क्त-प्रत्ययान्त के रूप दिये गये हैं। क्तवतु-प्रत्ययान्त रूप बनाने का सरल उपाय यह है कि क्त-प्रत्ययान्त रूप के बाद में 'वत्' और जोड़ दो। अन्य नियमों के लिए देखो अभ्यास २३-२५।

(२) प्रत्यय-विचार में आगे सर्वत्र धातुएँ अकारादि-क्रम से दी गयी हैं। अधिक प्रसिद्ध रूप ही यहाँ दिये गये हैं।

अद्	जग्धः, अन्नम्	कृष्	कृष्टः	छिद्	छिन्नः
अधि+इ	अधीतः	कॄ	कीर्णः	जन्	जातः
अर्च्	अर्चितः	क्रन्द्	क्रन्दितः	जीव्	जीवितः
अस् (२प.)	भूतः	क्रम्	क्रान्तः	ज्ञा	ज्ञातः
आप्	आप्तः	क्री	क्रीतः	तप्	तप्तः
आ+रभ्	आरब्धः	क्रीड्	क्रीडितः	तुष्	तुष्टः
आ+लम्ब्	आलम्बितः	क्रुध्	क्रुद्धः	तृप्	तृप्तः
आ+ह्वे	आहूतः	क्षिप्	क्षिप्तः	त्यज्	त्यक्तः
इ	इतः	खाद्	खादितः	दण्ड्	दण्डितः
इष्	इष्टः	गण्	गणितः	दा	दत्तः
ईक्ष्	ईक्षितः	गम्	गतः	दुह्	दुग्धः
उत्+डी	उड्डीनः	गर्ज्	गर्जितः	दृश्	दृष्टः
कथ्	कथितः	गै (गा)	गीतः	धा	हितः
कम्प्	कम्पितः	ग्रह्	गृहीतः	धाव्	धावितः
कुप्	कुपितः	चल्	चलितः	धृ	धृतः
कूर्द्	कूर्दितः	चिन्त्	चिन्तितः	ध्वंस्	ध्वस्तः
कृ	कृतः	चुर्	चोरितः	नम्	नतः

धातु	रूप
नश्	नष्टः
नी	नीतः
पच्	पक्तः
पठ्	पठितः
पत्	पतितः
पा (१ प०)	पीतः
पाल्	पालितः
पुष्	पुष्टः
पूज्	पूजितः
पृ	पूर्णः
प्रच्छ्	पृष्टः
प्रेर्	प्रेरितः
बन्ध्	बद्धः
बुध्	बुद्धः
ब्रू (वच्)	उक्तः
भक्ष्	भक्षितः
भण्	भणितः
भाष्	भाषितः
भिद्	भिन्नः
भी	भीतः
भुज्	भुक्तः
भू	भूतः
भ्रम्	भ्रान्तः
मन्	मतः
मिल्	मिलितः
मुच्	मुक्तः
मुह्	मुग्धः, मूढः
यज्	इष्टः
या	यातः
याच्	याचितः
युज्	युक्तः
रक्ष्	रक्षितः
रच्	रचितः
रञ्ज्	रक्तः
रम्	रतः
रुद्	रुदितः
रुध्	रुद्धः
रुह्	रूढः
लभ्	लब्धः
लिख्	लिखितः
लुभ्	लुब्धः
वच् (ब्रू)	उक्तः
वद्	उदितः
वप्	उप्तः
वस्	उषितः
वह्	ऊढः
विश्	विष्टः
वृत्	वृत्तः
वृध्	वृद्धः
व्यध्	विद्धः
शक्	शक्तः
शम्	शान्तः
शास्	शिष्टः
शिक्ष्	शिक्षितः
शी	शयितः
शुष्	शुष्कः
श्रि	श्रितः
श्रु	श्रुतः
सद्	सन्नः
सह्	सोढः
सिच्	सिक्तः
सिध्	सिद्धः
सिव्	स्यूतः
सृज्	सृष्टः
सेव्	सेवितः
स्तु	स्तुतः
स्था	स्थितः
स्निह्	स्निग्धः
स्पृश्	स्पृष्टः
स्वप्	सुप्तः
हन्	हतः
हस्	हसितः
हा (३ प०)	हीनः
हिंस्	हिंसितः
हु	हुतः
हृ	हृतः
हृष्	हृष्टः
हे	हूतः

(३) शतृ प्रत्यय (देखो अभ्यास २६)

सूचना—'रहा' अर्थ में परस्मैपदी धातुओं से लट् के स्थान पर शतृ प्रत्यय होता है। शतृ का अत् शेष रहता है। तीनों लिंगों में रूप चलते हैं। यहाँ केवल पुंलिंग के रूप दिये गये है। अन्य नियमों के लिए देखो अभ्यास २६। प्रसिद्ध प्रयोग ही यहाँ दिये गये हैं। **धातुएँ अकारादि-क्रम से दी गयी हैं।**

अस् (१ प.)	सन्	जीव्	जीवन्	भिद्	भिन्दन्
आप्	आप्नुवन्	ज्ञा	जानन्	भू	भवन्
आ+ह्वे	आह्वयन्	तप्	तपन्	भ्रम्	भ्रमन्
इष्	इच्छन्	तॄ	तरन्	रक्ष्	रक्षन्
कथ्	कथयन्	त्यज्	त्यजन्	रच्	रचयन्
कृ	कुर्वन्	दा	ददत्	लिख्	लिखन्
कृष्	कर्षन्	दुह्	दुहन्	वद्	वदन्
क्री	क्रीणन्	दृश्	पश्यन्	वस्	वसन्
क्रीड्	क्रीडन्	धा	दधत्	वह्	वहन्
खन्	खनन्	धाव्	धावन्	विश्	विशन्
खाद्	खादन्	नश्	नश्यन्	वृष्	वर्षन्
गण्	गणयन्	नी	नयन्	शक्	शक्नुवन्
गम्	गच्छन्	नृत्	नृत्यन्	श्रि	श्रयन्
गै	गायन्	पच्	पचन्	श्रु	शृण्वन्
ग्रह्	गृह्णन्	पठ्	पठन्	सद्	सीदन्
घ्रा	जिघ्रन्	पत्	पतन्	सिच्	सिञ्चन्
चर्	चरन्	पा (१ प.)	पिबन्	स्था	तिष्ठन्
चल्	चलन्	प्रच्छ्	पृच्छन्	स्मृ	स्मरन्
चिन्त्	चिन्तयन्	प्रेर्	प्रेरयन्	हन्	हनन्
चुर्	चोरयन्	ब्रू	ब्रुवन्	हस्	हसन्
जि	जयन्	भक्ष्	भक्षयन्	हृ	हरन्

(४) तुमुन्, (५) तव्यत्, (६) तृच् प्रत्यय (देखो अभ्यास २८, ३०)

सूचना—(क) तुमुन् प्रत्यय 'को' 'के लिए' अर्थ में होता है। तुमुन् का तुम् शेष रहता है। इसके रूप नहीं चलते हैं। धातु को गुण होता है। (ख) तव्यत् प्रत्यय 'चाहिए' अर्थ में होता है। तव्यत् का तव्य शेष रहता है। तव्य प्रत्यय लगाकर रूप बनाने का सरल उपाय यह है कि तुम् प्रत्यय वाले रूप में तुम् के स्थान पर तव्य लगा दो। (देखो अभ्यास ३०)। (ग) 'करनेवाला' या 'वाला' अर्थ में तृच् प्रत्यय होता है। तृच् का तृ शेष रहता है। इसके रूप बनाने का सरल उपाय यह है कि तुम् प्रत्यय वाले रूप में तुम् के स्थान पर तृ लगा दो। जैसे-कृ-कर्तुम्, कर्तव्य, कर्तृ। कर्ता, हर्ता, धर्ता, भर्ता, श्रोता सब रूप तृच् प्रत्यय प्र० के हैं। **धातुएँ अकारादिक्रम से दी गयी हैं।**

अद्	अत्तुम्	कृष्	कर्ष्टुम्	चर्	चरितुम्
अधि+इ	अध्येतुम्	क्रन्द्	क्रन्दितुम्	चल्	चलितुम्
अर्च्	अर्चितुम्	क्रम्	क्रमितुम्	चि	चेतुम्
अस् (२ प.)	भवितुम्	क्री	क्रेतुम्	चिन्त्	चिन्तयितुम्
आप्	आप्तुम्	क्रीड्	क्रीडितुम्	चुर्	चोरयितुम्
आ+रभ्	आरब्धुम्	क्रुध्	क्रोद्धुम्	छिद्	छेत्तुम्
आ+रुह्	आरोढुम्	क्षिप्	क्षेप्तुम्	जप्	जपितुम्
आ+ह्वे	आह्वातुम्	खन्	खनितुम्	जि	जेतुम्
इ	एतुम्	खाद्	खादितुम्	जीव्	जीवितुम्
इष्	एषितुम्	गण्	गणयितुम्	ज्ञा	ज्ञातुम्
ईक्ष्	ईक्षितुम्	गम्	गन्तुम्	तप्	तप्तुम्
कथ्	कथयितुम्	गर्ज्	गर्जितुम्	तृ	तरितुम्
कम्प्	कम्पितुम्	गै	गातुम्	त्यज्	त्यक्तुम्
कूर्द्	कूर्दितुम्	ग्रह्	ग्रहीतुम्	त्रै	त्रातुम्
कृ	कर्तुम्	घ्रा	घ्रातुम्	दंश्	दंष्टुम्

दह्	दग्धुम्	भिद्	भेत्तुम्	वृत्	वर्तितुम्
दा	दातुम्	भी	भेतुम्	वृध्	वर्धितुम्
दिश्	देष्टुम्	भुज्	भोक्तुम्	वृष्	वर्षितुम्
दुह्	दोग्धुम्	भू	भवितुम्	शक्	शक्तुम्
धा	धातुम्	भृ	भर्तुम्	शप्	शप्तुम्
धाव्	धावितुम्	भ्रम्	भ्रमितुम्	शिक्ष्	शिक्षितुम्
धृ	धर्तुम्	मिल्	मेलितुम्	शी	शयितुम्
ध्यै	ध्यातुम्	मुच्	मोक्तुम्	श्रि	श्रयितुम्
नम्	नन्तुम्	मृ	मर्तुम्	श्रु	श्रोतुम्
नश्	नशितुम्	यज्	यष्टुम्	सह्	सोढुम्
नी	नेतुम्	या	यातुम्	सिच्	सेक्तुम्
नृत्	नर्तितुम्	याच्	याचितुम्	सिव्	सेवितुम्
पच्	पक्तुम्	युध्	योद्धुम्	सृ	सर्तुम्
पठ्	पठितुम्	रक्ष्	रक्षितुम्	सृज्	स्रष्टुम्
पत्	पतितुम्	रच्	रचयितुम्	सृप्	सर्प्तुम्
पद्	पत्तुम्	रम्	रन्तुम्	सेव्	सेवितुम्
पलाय्	पलायितुम्	रुद्	रोदितुम्	स्तु	स्तोतुम्
पा (१, २ प.)	पातुम्	लभ्	लब्धुम्	स्था	स्थातुम्
पालि	पालयितुम्	लिख्	लेखितुम्	स्ना	स्नातुम्
प्रच्छ्	प्रष्टुम्	लिह्	लेढुम्	स्पृश्	स्प्रष्टुम्
प्रेर्	प्रेरयितुम्	वच्	वक्तुम्	स्मृ	स्मर्तुम्
बन्ध्	बन्द्धुम्	वद्	वदितुम्	हन्	हन्तुम्
ब्रू	वक्तुम्	वप्	वप्तुम्	हस्	हसितुम्
भक्ष्	भक्षयितुम्	वस्	वस्तुम्	हा	हातुम्
भज्	भक्तुम्	वह्	वोढुम्	हृ	हर्तुम्
भाष्	भाषितुम्	विश्	वेष्टुम्	हृष्	हर्षितुम्

(७) क्त्वा, (८) ल्यप् प्रत्यय (देखो अभ्यास २९)

सूचना— 'कर' या 'करके' अर्थ में क्त्वा और ल्यप् प्रत्यय होते हैं। क्त्वा का त्वा और ल्यप् का य शेष रहता है। धातु से पहले उपसर्ग नहीं होगा तो क्त्वा प्रत्यय होगा। यदि उपसर्ग (प्र, सम्, आ, उप, नि, वि आदि) पहले होगा तो ल्यप् होगा। दोनों प्रत्ययान्त रूप अव्यय होते हैं।, अतः इनके रूप नहीं चलते। अधिक प्रचलित रूप ही यहाँ दिये गये हैं। **धातुएँ अकारादि-क्रम से दी गयी हैं।**

अधि+इ (२ आ.)—		अधीत्य
अस् (२ प०)	भूत्वा	संभूय
आप्	आप्त्वा	प्राप्य
इ	इत्वा	प्रेत्य
ईक्ष्	ईक्षित्वा	समीक्ष्य
उत्+डी	—	उड्डीय
कूर्द्	कूर्दित्वा	प्रकूर्द्य
कृ	कृत्वा	उपकृत्य
कृष्	कृष्ट्वा	आकृष्य
कृ	कीर्त्वा	विकीर्य
क्रन्द्	क्रन्दित्वा	आक्रन्द्य
क्री	क्रीत्वा	विक्रीय
क्रीड्	क्रीडित्वा	प्रक्रीड्य
क्षिप्	क्षिप्त्वा	प्रक्षिप्य
खन्	खनित्वा	उत्खन्य
गण्	गणयित्वा	विगणय्य
गम्	गत्वा	आगम्य
ग्रह्	गृहीत्वा	संगृह्य
घ्रा	घ्रात्वा	आघ्राय
चिन्त्	चिन्तयित्वा	संचिन्त्य
छिद्	छित्त्वा	उच्छिद्य

जि	जित्वा	विजित्य
ज्ञा	ज्ञात्वा	विज्ञाय
तन्	तनित्वा	वितत्य
तुष्	तुष्ट्वा	सन्तुष्य
तृ	तीर्त्वा	उत्तीर्य
त्यज्	त्यक्त्वा	परित्यज्य
दा	दत्त्वा	आदाय
दिश्	दिष्ट्वा	उपदिश्य
दुह्	दुग्ध्वा	संदुह्य
दृश्	दृष्ट्वा	संदृश्य
धा	हित्वा	विधाय
धाव्	धावित्वा	प्रधाव्य
ध्यै	ध्यात्वा	संधाय
नम्	नत्वा	प्रणम्य
नश्	नष्ट्वा	विनश्य
नि+वृ	—	निवृत्य
नी	नीत्वा	आनीय
नृत्	नर्तित्वा	प्रनृत्य
पच्	पक्त्वा	संपच्य
पठ्	पठित्वा	संपठ्य
पत्	पतित्वा	निपत्य

पलाय् (परा+अय्)—		पलाय्य	लिख्	लिखित्वा	विलिख्य
पा (१प.)	पीत्वा	निपाय	लिह्	लीढ्वा	आलिह्य
पॄ	पूर्त्वा	आपूर्य	वद्	उदित्वा	अनूद्य
प्रच्छ्	पृष्ट्वा	संपृच्छ्य	वप्	उप्त्वा	समुप्य
बुध्	बुद्ध्वा	प्रबुध्य	वस्	उषित्वा	उपोष्य
ब्रू	उक्त्वा	प्रोच्य	वह्	ऊढ्वा	प्रोह्य
भक्ष्	भक्षयित्वा	संभक्ष्य	विश्	विष्ट्वा	प्रविश्य
भज्	भक्त्वा	विभज्य	वृत्	वर्तित्वा	निवृत्य
भाष्	भाषित्वा	संभाष्य	वृष्	वर्षित्वा	प्रवृष्य
भिद्	भित्त्वा	प्रभिद्य	शम्	शान्त्वा	निशम्य
भुज्	भुक्त्वा	उपभुज्य	शास्	शिष्ट्वा	अनुशिष्य
भू	भूत्वा	संभूय	शी	शयित्वा	संशय्य
भ्रम्	भ्रमित्वा	संभ्रम्य	श्रि	श्रित्वा	आश्रित्य
मन्	मत्वा	अनुमत्य	श्रु	श्रुत्वा	संश्रुत्य
मिल्	मिलित्वा	संमिल्य	सह्	सहित्वा	संसह्य
मुच्	मुक्त्वा	विमुच्य	सिच्	सिक्त्वा	अभिषिच्य
यज्	इष्ट्वा	समिज्य	सृज्	सृष्ट्वा	विसृज्य
या	यात्वा	प्रयाय	सेव्	सेवित्वा	निषेव्य
युज्	युक्त्वा	प्रयुज्य	स्तु	स्तुत्वा	प्रस्तुत्य
युध्	युद्ध्वा	प्रयुध्य	स्था	स्थित्वा	प्रस्थाय
रक्ष्	रक्षित्वा	संरक्ष्य	स्पृश्	स्पृष्ट्वा	संस्पृश्य
रच्	रचयित्वा	विरचय्य	स्मृ	स्मृत्वा	विस्मृत्य
रभ्	रब्ध्वा	आरभ्य	हन्	हत्वा	निहत्य
रम्	रत्वा	विरम्य	हस्	हसित्वा	विहस्य
रुह्	रूढ्वा	आरुह्य	हा (३प.)	हित्वा	विहाय
लप्	लपित्वा	विलप्य	हृ	हृत्वा	प्रहृत्य
लभ्	लब्ध्वा	उपलभ्य	ह्वे	हूत्वा	आहूय

(९) ल्युट्, (१०) अनीयर् प्रत्यय (देखो अभ्यास ३०)

सूचना— (क) भाववाचक शब्द बनाने के लिए धातु से ल्युट् प्रत्यय होता हैं। ल्युट् का अन शेष रहता है। धातु को गुण होता है। ल्युट् (अन) प्रत्यय वाले शब्द नपुंसकलिंग होते हैं। जैसे—हिन्दी में पढ़ना, लिखना, जाना, आना या संस्कृत में पठनम्, लेखनम्, गमनम्, आगमनम्। (ख) 'चाहिए' अर्थ में धातु से अनीयर् प्रत्यय होता है। अनीयर् का अनीय शेष रहता है। अनीय लगाकर रूप बनाने का सरल उपाय यह है कि ल्युट् प्रत्यय वाले शब्द के अन्तिम अन के स्थान पर अनीय लगा दो। जैसे-पठ् का पठन, पठनीय। लिख्-लेखन, लेखनीय।

धातुएँ अकारादि-क्रम से दी गई हैं।

अधि+इ	अध्ययनम्	क्रम्	क्रमणम्	जि	जयनम्
अन्विष्	अन्वेषणम्	क्री	क्रयणम्	जीव्	जीवनम्
अर्च्	अर्चनम्	क्रीड्	क्रीडनम्	ज्ञा	ज्ञानम्
अर्ज्	अर्जनम्	क्रुध्	क्रोधनम्	ज्वल	ज्वलनम्
अस् (२प.)	भवनम्	क्षिप्	क्षेपणम्	तप्	तपनम्
आ+क्रम्	आक्रमणम्	खन्	खननम्	तुष्	तोषणम्
आ+चर्	आचरणम्	खाद्	खादनम्	तृप्	तर्पणम्
आ+रुह्	आरोहणम्	गण्	गणनम्	तॄ	तरणम्
आस्	आसनम्	गम्	गमनम्	त्यज्	त्यजनम्
आ+ह्वे	आह्वानम्	गर्ज्	गर्जनम्	त्रै	त्राणम्
ईक्ष्	ईक्षणम्	गै	गानम्	दंश्	दंशनम्
उद्+डी	उड्डयनम्	ग्रह्	ग्रहणम्	दण्ड्	दण्डनम्
कथ्	कथनम्	चर्	चरणम्	दह्	दहनम्
कम्प्	कम्पनम्	चल्	चलनम्	दा	दानम्
कूर्द्	कूर्दनम्	चि	चयनम्	दुह्	दोहनम्
कृ	करणम्	चिन्त्	चिन्तनम्	दृश्	दर्शनम्
कृष्	कर्षणम्	चुर्	चोरणम्	धा	धानम्
क्रन्द्	क्रन्दनम्	छिद्	छेदनम्	धाव्	धावनम्

धातु	ल्युट्	धातु	ल्युट्	धातु	ल्युट्
धृ	धरणम्	भञ्ज्	भञ्जनम्	वृध्	वर्धनम्
ध्यै	ध्यानम्	भाष्	भाषणम्	वृष्	वर्षणम्
नश्	नशनम्	भुज्	भोजनम्	शप्	शपनम्
नि+गॄ	निगरणम्	भू	भवनम्	शम्	शमनम्
निन्द्	निन्दनम्	भृ	भरणम्	शास्	शासनम्
नि+यम्	नियमनम्	भ्रम्	भ्रमणम्	शिक्ष्	शिक्षणम्
नि+विद्	निवेदनम्	मन्	मननम्	शी	शयनम्
नी	नयनम्	मिल्	मेलनम्	शुभ्	शोभनम्
नृत्	नर्तनम्	मुच्	मोचनम्	शुष्	शोषणम्
पच्	पचनम्	मुह्	मोहनम्	श्रु	श्रवणम्
पठ्	पठनम्	मृ	मरणम्	सं+मिल्	संमेलनम्
पत्	पतनम्	या	यानम्	सह्	सहनम्
पलाय्	पलायनम्	याच्	याचनम्	साध्	साधनम्
पा	पानम्	युज्	योजनम्	सिच्	सेचनम्
पाल्	पालनम्	रक्ष्	रक्षणम्	सिव्	सेवनम्
पुष्	पोषणम्	रञ्ज्	रञ्जनम्	सृज्	सर्जनम्
पूज्	पूजनम्	रुद्	रोदनम्	सेव्	सेवनम्
प्र+काश्	प्रकाशनम्	लिख्	लेखनम्	स्तु	स्तवनम्
प्र+आप्	प्रापणम्	लोच्	लोचनम्	स्था	स्थानम्
प्र+हस्	प्रहसनम्	वच्	वचनम्	स्ना	स्नानम्
प्रेर्	प्रेरणम्	वञ्च्	वञ्चनम्	स्पृश्	स्पर्शनम्
प्रेष्	प्रेषणम्	वन्द्	वन्दनम्	स्मृ	स्मरणम्
बन्ध्	बन्धनम्	वर्ण्	वर्णनम्	स्वप्	स्वपनम्
ब्रू	वचनम्	वह्	वहनम्	हन्	हननम्
भक्ष्	भक्षणम्	वि+धा	विधानम्	हु	हवनम्
भज्	भजनम्	वृत्	वर्तनम्	हृ	हरणम्

(७) अनुवादार्थ गद्य-संग्रह

(१) संस्कृत-भाषा

शुद्ध भाषा को संस्कृत कहते हैं। इसके ही नाम देवभाषा, देववाणी आदि हैं। यह भारतवर्ष की एक बहुमूल्य निधि है। भारतवर्ष का सारा प्राचीन ज्ञान-भण्डार इसी भाषा में है। वेद, उपनिषद्, दर्शन, रामायण, महाभारत, गीता आदि ग्रन्थ इसी भाषा में हैं। प्राचीन समय में संस्कृत भाषा आर्यों के दैनिक व्यवहार की भाषा थी। पाणिनि और पंतजलि के कथनों से यह बात सर्वथा सिद्ध होती है। इस भाषा के ज्ञान से ही प्राचीन भारतीय संस्कृति का ज्ञान होता है। हमारा कर्तव्य है कि हम इसके प्रचार और उन्नति के लिए प्रयत्न करें।

(२) कालिदास

महाकवि कालिदास संस्कृत-साहित्य के सर्वोत्तम कवि हैं। उन्होंने नाटक, महाकाव्य और गीतिकाव्य लिखे हैं। उनके लिखे हुए ७ प्रमुख ग्रन्थ ये हैं— (क) नाटक—मालविकाग्निमित्र, विक्रमोर्वशीय, अभिज्ञान-शाकुन्तल, (ख) महाकाव्य—कुमारसंभव, रघुवंश, (ग) गीतिकाव्य—ऋतुसंहार, मेघदूत। उनकी प्रतिभा सर्वतोमुखी थी। उनकी रचनाओं में प्रसाद-गुण और माधुर्य-गुण हैं। वे नीरस कथा को भी सरस बना देते हैं। उनकी लोकप्रियता का मुख्य कारण है— उनकी सरल, सुन्दर और शुद्ध शैली। वे बहुत कम शब्दों के द्वारा अधिक और सुन्दर अर्थ कहते हैं। वे चरित्र-चित्रण में असाधारण पटु हैं। उनका भाषा पर पूर्ण अधिकार है। वे उपमाओं के लिए बहुत प्रसिद्ध हैं। उनकी रचनाएँ दूसरे कवियों के लिए आदर्श रही हैं।

संकेत—(१) वचनैः, एतत् सिध्यति, प्रयतेमहि। (२) कृतिषु, सम्पादयति, स्वल्पैरेव पदैः, वर्णयति, आदर्शरूपा अभवन्।

(३) अहिंसा

किसी को दुःख देने को हिंसा कहते हैं। हिंसा तीन प्रकार की होती है-मन से, वचन से और कर्म से। मन से किसी का अशुभ सोचना, यह मानसिक हिंसा है। कटु-वचन और असत्य-भाषण से किसी को दुःखित करना, यह वाचिक हिंसा है। किसी जीव की हत्या करना या उसे दण्ड आदि के द्वारा पीड़ा देना, यह कायिक हिंसा है। इन तीनों हिंसाओं के त्याग को अहिंसा कहते हैं। संसार में अहिंसा की बहुत आवश्यकता है। अहिंसा से मनुष्य की आत्मा प्रसन्न रहती है। अहिंसा से पशु-पक्षी भी मनुष्यों पर प्रेम करते हैं। अहिंसा से शत्रु भी मित्र हो जाते हैं। संसार के सभी महापुरुषों ने अहिंसा को अपनाया है। अहिंसा से ही संसार में शान्ति रह सकती है। अतएव कहा गया है—अहिंसा परमो धर्मः।

(४) आरोग्य

मनुष्य के जीवन में आरोग्य का बहुत महत्त्व है। मनुष्य का जीवन तभी सुखी हो सकता है, जब वह नीरोग हो। जो मनुष्य नीरोग है, वह सब प्रकार के पुरुषार्थ कर सकता है। जो मनुष्य रुग्ण है, जिसके शरीर में शक्ति नहीं है, वह किसी प्रकार भी संसार में सुख का अनुभव नहीं कर सकता है। अतः शरीर को नीरोग रखना अनिवार्य कर्तव्य है। शरीर की नीरोगता व्यायाम से होती है। व्यायाम अनेक प्रकार के हैं, जैसे घूमना, दौड़ना, खेलना, तैरना आदि। बालकों के लिये खेलना, दौड़ना और तैरना विशेष लाभप्रद हैं। योगासन और भारतीय व्यायाम भी शरीर की नीरोगता के लिए विशेष उपयोगी हैं। जीवन को सुखमय बनाने के लिए सदा व्यायाम करना चाहिये और शरीर को नीरोग रखना चाहिये।

संकेतः—(३) परपीडनम्, त्रिविधा, मानसिकी, वाचिकी, हननम्, कायिकी, तिसृणाम्, प्रसीदति, स्वीकृतवन्तः, संभवति। (४) सर्वविधम्, कर्तुं शक्नोति, कथमपि, नानाविधाः, तरणम्, निरामयं कर्तव्यम्।

(५) सदाचार

सज्जनों के आचरण को सदाचार कहते हैं। सज्जन जिस प्रकार आचरण करते हैं, उसी प्रकार आचरण करना सदाचार है। सज्जन अपनी इन्द्रियों को वश में रखते हैं, दुर्गुणों पर विजय पाते हैं और सद्‌गुणों को उन्नत करते हैं। वे सत्य बोलते हैं, असत्य को छोड़ते हैं, माता-पिता और गुरुजनों का आदर करते हैं, सत्कार्यों में प्रवृत्त होते हैं, असत्कार्यों से निवृत्त होते हैं और परोपकार के कार्य करते हैं। सदाचार को अपनाने से ही देश, जाति और समाज की उन्नति होती है। सदाचार से ही मनुष्य संयमी होता है। सदाचार से मनुष्य का शरीर पुष्ट होता है, उसकी बुद्धि बढ़ती है, मन निर्मल होता है, सद्‌गुणों का समावेश होता है और दुर्गुणों का नाश होता है। अतएव कहा गया है—आचारः परमो धर्मः।

(६) सत्संगति

सज्जनों की संगति को सत्संगति कहते हैं। सत्संगति एक विशेष गुण है। सज्जनों की संगति से मनुष्य में सद्‌गुण का समावेश होता है और दुर्गुणों का नाश होता है। मनुष्य सामाजिक प्राणी है, वह संगति से ही गुणों और अवगुणों को सीखता है। वह जैसे मनुष्यों की संगति में रहेगा, वैसे ही गुण सीखेगा। सज्जनों की संगति से मनुष्य सद्‌गुण सीखता है और दुर्जनों की संगति से दुर्गुण। सत्संगति से मनुष्य का जीवन सुख और शान्ति से युक्त होता है, मनुष्य उन्नति की ओर अग्रसर होता है और उसकी कीर्ति फैलती है। बाल्यकाल में बालक पर संगति का प्रभाव विशेषरूप से होता है। अतः जीवन को सुखी और शान्तियुक्त बनाने के लिए सत्संगति ही करनी चाहिये।

संकेतः—(५) आचरन्ति, स्थापयन्ति, लभन्ते, प्रवर्तन्ते, निवर्तन्ते, वर्धते। (६) शिक्षते, निवर्त्स्यति, शिक्षिष्यति, प्रथते।

(७) महात्मा गांधी

महात्मा गांधी का जन्म गुजरात प्रान्त में हुआ था। इनके पिता का नाम करमचन्द और माता का नाम पुतलीबाई था। ये दोनों **बहुत सज्जन-प्रकृति के** थे। महात्मा गांधी भी बचपन से ही **सज्जन-स्वभाव** के थे। महात्मा गांधी ने भारतवर्ष और विदेशों में उच्च शिक्षा प्राप्त की। तत्पश्चात् वे देश-सेवा के काम में लग गये। उन्होंने अपना सारा जीनव भारतवर्ष की सेवा में **लगा दिया**। उन्होंने प्रण किया कि भारतवर्ष को स्वतन्त्र करूँगा। उनके त्याग और तपस्या का फल है कि भारत स्वतन्त्र हुआ और आज भारत स्वतन्त्र राष्ट्रों में आदरणीय हो रहा है। वे सत्य और अहिंसा के प्रबल समर्थक और पालक थे। उन्होंने हरिजनोद्धार, स्त्री-शिक्षा, भारतीय कला-कौशल की उन्नति आदि प्रशंसनीय कार्य किये हैं।

(८) महर्षि दयानन्द

महर्षि दयानन्द का जन्म गुजरात में हुआ था। वे भारतवर्ष के समाज-सुधारकों में सर्वप्रथम हैं। अपने **चाचा** और बहिन की मृत्यु को देखकर उनके मन में वैराग्य **उत्पन्न हुआ** और वे सत्य शिव को **ढूँढ़ने के लिए** घर से निकल पड़े। उन्होंने अनेक वर्षों तक तपस्या की। उन्होंने समाज की त्रुटियों को दूर करने के लिए आर्यसमाज की **स्थापना की**। उन्होंने वेदों का भाष्य करके वेदों का महत्त्व संसार को प्रदर्शित किया। उन्होंने समाज-सुधार के बहुत-से काम किये। जैसे-अस्पृश्यों का उद्धार, स्त्री-शिक्षा, गो-रक्षा, गोशाला और अनाथालयों की स्थापना आदि। वे पूर्ण सदाचारी, त्यागी, तपस्वी, देशभक्त, समाज-सुधारक, वेदों के अद्वितीय विद्वान्, असाधारण वक्ता और निर्भीक संन्यासी थे।

संकेत:—(७) प्रकृत्या अतिसज्जनौ, सरलस्वभाव:, यापितवान् (८) पितृव्यस्य, प्रादुरभवत्, अन्वेष्टुम्, अस्थापयत्।

(९) दशहरा

दशहरा आर्यों का सबसे मुख्य पर्व है। यह पर्व आश्विन मास में शुक्ल पक्ष की दशमी को होता है। यह क्षत्रियों का मुख्य पर्व माना जाता है। जनश्रुति है कि श्री रामचन्द्रजी ने इसी दिन रावण पर विजय पायी थी। इसलिए इस पर्व के अवसर पर हिन्दू रामलीला का आयोजन करते हैं। उसमें राम की विजय और पापी रावण का वध दिखाते हैं। यह पर्व बहुत प्राचीन समय से मनाया जाता है। क्षत्रिय इस अवसर पर अपने शस्त्रों की पूजा करते हैं। यह पर्व शिक्षा देता है कि धर्मात्मा की सदा विजय होती है और पापी का नाश होता है। यह पर्व क्षात्रबल की उन्नति का सूचक है। क्षात्रबल की उन्नति से ही देश की उन्नति होती है। इस पर्व को विजयादशमी भी कहते हैं।

(१०) दीपावली

दीपावली भी हिन्दुओं का प्रसिद्ध पर्व है। इसको दीवाली और दीपम्रालिका भी कहते हैं। यह कार्तिक मास की अमावस्या के दिन विशेष आयोजन के साथ मनायी जाती है। इसके विषय में जनश्रुति है कि श्री रामचन्द्रजी रावण को जीतकर जब अयोध्या लौटे तो इसी दिन विजयोत्सव का आयोजन किया गया था। इस अवसर पर सभी हिन्दू अपने मकानों की स्वच्छता करते और कराते हैं। यह वैश्यों का मुख्य पर्व माना जाता है। वे इस दिन लक्ष्मी-पूजन करते हैं और अपने व्यापार में श्री-वृद्धि के लिए परमात्मा से प्रार्थना करते हैं। इस अवसर पर रात्रि में सभी घर दीपमाला से सुशोभित होते हैं और सभी आनन्दोत्सव मनाते हैं।

संकेतः—(९) पर्व (पर्वन्), दशम्याम्, मन्यते, दर्शयन्ति, आयोज्यते। (१०) कथ्यते, विजित्य, प्रत्यागतः, कारयन्ति, गण्यते, सम्पादयन्ति।

(११) स्वदेश-प्रेम

स्वदेश-प्रेम सर्वोत्तम गुणों में से एक गुण है। संसार का प्रत्येक मनुष्य अपने देश का ऋणी है। जिस देश में उसने जन्म पाया है, जहाँ निरन्तर खेला और कूदा है, जिसके अन्न और जल का उपभोग किया है, जहाँ की वायु से जीवित रहा है, उसके ऋण से कभी उऋण नहीं हो सकता है। मनुष्य अपने देश का ऋणी है; अतः उसका कर्तव्य है कि वह देश की उन्नति के लिए कुछ कार्य करे। वह कोई ऐसा कार्य न करे, जिससे देश की अवनति या अकीर्ति हो। महात्मा गांधी, सुभाष बोस, जवाहरलाल नेहरू आदि ने अपना सारा जीवन देश के लिए दे दिया, अतः वे महापुरुष हो गये हैं। हमारा भी कर्तव्य है कि देश की उन्नति के लिए सदा यत्नशील हों।

(१२) स्वावलम्बन

स्वावलम्बन वह अलौकिक गुण है, जो मनुष्य के जीवन को सदा सुखमय बनाता है। स्वावलम्बन शिक्षा देता है कि मनुष्य को अपना काम स्वयं करना चाहिए। अपने काम के लिए दूसरों के आश्रित नहीं रहना चाहिए। जो मनुष्य जितना स्वावलम्बी होता है, वह उतना ही सुखी रहता है। जो परावलम्बी होता है, वह सदा दुःखी रहता है। स्वावलम्बन से मनुष्य में पुरुषार्थ, साहस, धैर्य, कर्तव्यशीलता और प्रसन्न-चित्तता आदि गुणों का उदय होता है। परावलम्बन से हीनता, दीनता, खिन्नता, अधीरता आदि दोषों का उदय होता है। उन्नति का साधन स्वावलम्बन है। अतः जो मनुष्य या देश उन्नति करना चाहता है, उसे स्वावलम्बी होना चाहिए।

संकेतः—(११) अनृणः, भवितुं शक्नोति, अर्पितवन्तः। (१२) करोति, शिक्षयति, करणीयम्, स्यात्, यावान्, तावान्, भवेत्।

(१३) अनुशासन-पालन

कुछ विशेष नियमों के पालन और अपने से बड़ों की आज्ञा के पालन करने को अनुशासन-पालन कहते हैं। अनुशासन-पालन से मनुष्य का जीवन नियमित होता है। वह अपने सब कामों को ठीक समय पर करता है। वह अपने समय का मूल्य समझता है और अपने जीवन का महत्त्व समझता है। अनुशासन-पालन से मनुष्य उन्नति की ओर जाता है। जो मनुष्य, जो समाज और जो देश अनुशासन का पालन करता है, वह उन्नत होता है। जहाँ अनुशासन नहीं होता है, वहाँ अनियम और अव्यवस्था होती है। जीवन के प्रत्येक स्थान पर अनुशासन-पालन की आवश्यकता होती है। जीवन की सफलता के लिए अनुशासन का पालन अवश्य करना चाहिए।

(१४) मित्रता

निःस्वार्थ भाव से परस्पर स्नेह करने को मित्रता कहते हैं। मनुष्य सामाजिक प्राणी है, वह चाहता है कि उसका कोई मित्र अवश्य हो, जिसे वह अपने दुःख और सुख की बातें बता सके। अतएव मित्र की आवश्यकता होती है। मित्र का निर्णय सावधानी से करना चाहिए। मित्र ऐसा होना चाहिए कि जो स्वार्थी न हो, वंचक न हो, दुर्जन न हो। सच्चा मित्र वह है, जो बड़ी विपत्ति में भी साथ न छोड़े। दुःख में अपने मित्र का साथ दे और सुख में सुखी हो। सदा सज्जन से मित्रता करनी चाहिए, दुर्जन से नहीं। दुर्जन से मित्रता दुःखदायी होती है। मित्र का कर्तव्य है कि वह अपने मित्र के दुःख में दुःखी हो, उसे उत्तम सम्मति दे, उसे कुमार्ग से बचावे और सदा सन्मार्ग पर लावे।

संकेतः—(१३) ज्येष्ठानाम्, आज्ञापालनम्, यथासमयम्, जानाति। (१४) पारस्परिकः स्नेहः, विज्ञापयेत्, सावधानतया, तदृशं स्यात्, यथार्थः, सङ्गम्, साहाय्यम् आचरेत्, निवारयेत्, आनयेत्।

(१५) विद्यार्थि-जीवन

जीवन को चार भागों में बाँटा गया है। इनको चार आश्रम भी कहते हैं। पहला आश्रम ब्रह्मचर्य आश्रम है। यही विद्यार्थि-जीवन है। मनुष्य के जीवन की पहली आधार-शिला विद्यार्थि-जीवन ही है। मनुष्य विद्यार्थि-जीवन में अपना जीवन जैसा बना लेता है, उसका भविष्य जीवन भी उसी प्रकार का हो जाता है। यही समय है जब विद्यार्थी सारी विद्याओं, सारे गुणों और सारी कलाओं को सीखता है। विद्यार्थि-जीवन में सीखी हुई सारी विद्याएँ आदि उसके भावी जीवन में काम आती हैं। इस समय ही मनुष्य आचार-विचार, संयम, शील और सत्य आदि गुणों को सीखता है। जो मनुष्य विद्यार्थि-जीवन का जितना सदुपयोग करेगा, वह उतना ही बड़ा मनुष्य होगा।

(१६) शिक्षा का उद्देश्य

शिक्षा मनुष्य की बौद्धिक शक्ति को विकसित करती है। शिक्षा ही मनुष्य को पशु से पृथक् करती है। शिक्षा के द्वारा मनुष्य विद्वान् और बुद्धिमान् होता है। शिक्षा के द्वारा मनुष्य शुभ-अशुभ, पाप-पुण्य, उचित-अनुचित, धर्म-अधर्म को ठीक-ठीक समझता है। वह उनमें से उत्तम वस्तुओं और गुणों को स्वीकार कर लेता है और अनुचित को छोड़ देता है। शिक्षा से मनुष्य अपने कर्तव्य को ठीक जानकर एक सुयोग्य नागरिक होता है। वह ज्ञानोपार्जन करके अपनी उन्नति करता है और अपनी विद्या के द्वारा समाज और विश्व को उन्नत करता है। शिक्षा का उद्देश्य है—मनुष्य की विवेक-शक्ति को जागृत करना, उसके चरित्र को शुद्ध बनाना, बौद्धिक शक्तियों को विकसित करना, शारीरिक, मानसिक और आध्यात्मिक उन्नति करना।

संकेत:—(१५) चतुर्षु भागेषु, विभज्यते, विद्यार्थि-जीवनम्, यादृशम्, तादृशम्, शिक्षते, भाविनि, उपयोगिन्य: भवन्ति, महान्। (१६) बौद्धिकीम्, विकासयति, यथार्थत: जानाति, स्वीकरोति, विज्ञाय, उद्बोधनम्, करणम्, विकासनम्।

(८) निबन्ध-संग्रह

आवश्यक निर्देश

१. किसी विषय पर अपने विचारों और भावों को सुन्दर, सुगठित, सुबोध एवं क्रमबद्ध भाषा में लिखने को निबन्ध कहते हैं। निबन्ध के लिए दो बातों की आवश्यक़ता होती है—१. निबन्ध की सामग्री, २. निबन्ध की शैली।

निबन्ध की सामग्री एकत्र करने के तीन साधन हैं—१. निरीक्षण अर्थात् प्रकृति की वस्तुओं को स्वयं सावधानी से देखना और उनके बारे में ज्ञान प्राप्त करना। २. अध्ययन अर्थात् पुस्तकों आदि से उस विषय का ठीक ढंग से ज्ञान प्राप्त करना। ३. मनन अर्थात् स्वयं उस विषय पर विचार करना।

२. निबन्ध-लेखन में इन बातों का सदा ध्यान रखें—१. **प्रस्तावना या आरम्भ**—प्रारम्भ में विषय का निर्देश करें और उसका लक्षण आदि लिखें। २. **विवेचन**—बीच में विषय का विस्तृत विवेचन करें। उस वस्तु के लाभ-हानि, गुण-अवगुण, उपयोगिता-अनुपयोगिता आदि का विस्तृत विचार करें। अपने कथन की पुष्टि में सुभाषित, पद्य या श्लोक आदि उद्धरण के रूप में दे सकते हैं। ३. **उपसंहार**—अन्त में अपने कथन का सारांश संक्षेप में दें। प्रस्तावना और उपसंहार संक्षेप में दें। अधिक स्थान विवेचन में दें।

३. निबन्ध की शैली के विषय में इन बातों का ध्यान रखें—१. भाषा व्याकरण की दृष्टि से शुद्ध हो। २. भाषा प्रारम्भ से अन्त तक एक-सी हो। ३. भाषा में प्रवाह हो और स्वाभाविकता हो। ४. उपयुक्त और असंदिग्ध शब्दों का ही प्रयोग करें। ५. भाषा सरल, सुबोध और आकर्षक हो। ६. सुभाषित, लोकोक्ति और अलंकारों को भी आवश्यकतानुसार दें। ७. अनावश्यक विस्तार, पुनरुक्ति, पाण्डित्य-प्रदर्शन और क्लिष्टता का परित्याग करें।

४. निबन्ध के मुख्यतया तीन भेद हैं—१. वर्णनात्मक, २. विवरणात्मक, ३. विचारात्मक।

५. उदाहरण के लिए २० निबन्ध अति प्रसिद्ध विषयों पर सरल संस्कृत में दिये गये हैं। सरलता और छात्रों की सुविधा को ध्यान में रखते हुए इन निबन्धों में सन्धियाँ नहीं की गयी हैं। छात्र आवश्यकतानुसार संन्धियाँ कर लें।

(१) विद्या

कस्यापि वस्तुनः यथार्थतः ज्ञानं विद्या इति कथ्यते। संसारे यानि धनानि सन्ति, तेषु विद्या सर्वश्रेष्ठं धनम् अस्ति। विद्यया मनुष्यः स्वकीयं कर्तव्यम् अकर्तव्यं च जानाति। विद्यया एव मनुष्यः जानाति यत् संसारे कः धर्मः, कः अधर्मः, किं पापम्, किं च पुण्यम् इति। विद्यया एव मनुष्यः सन्मार्गम् अनुसरति, कुमार्गं च परित्यजति। विद्यया एव मनुष्यः यर्थाथतः मनुष्यः भवति। यः विद्याहीनः अस्ति, स स्वकीयं कर्तव्यं न जानाति। अतः कथ्यते—विद्याविहीनः पशुः, अर्थात् विद्यया रहितः नरः पशुः भवति। सर्वाणि धनानि व्यये कृते न्यूनानि भवन्ति, परन्तु विद्या व्यये कृते वर्धते। विद्यया मनुष्यस्य सम्मानं भवति। विद्वान् मनुष्यः सर्वत्र सम्मानं लभते। राजा स्वदेशे एव पूज्यते, परन्तु विद्वान् सम्पूर्णे जगति आदरं प्राप्नोति। सर्वेषाम् एतत् कर्तव्यम् अस्ति यत् ते परिश्रमेण विद्यां पठेयुः।

(२) सत्यम्

यद् वस्तु यथा विद्यते, तस्य तेन एव रूपेण कथनं सत्यम् इति कथ्यते। संसारे सत्यस्य महती आवश्यकता अस्ति। सत्येन एव समाजस्य स्थितिः अस्ति। सत्यस्य एव एष महिमा अस्ति, यद् वयं समाजे मनुष्येषु विश्वासं कुर्मः। सत्यभाषणेन मनुष्यः निर्भीकः भवति। सत्यभाषणेन तस्य तेजः यशः कीर्तिः गौरवं च वर्धन्ते। य सत्यं वदति, स सदा सर्वेभ्यः पापेभ्यः निवृत्तः भवति। स सत्कर्मसु प्रवर्तते, सद्गुणान् आश्रयति, धर्मे मतिं करेति, अधर्मे न प्रवर्तते, यशः इच्छति, प्रतिष्ठां प्रियं मन्यते, अप्रतिष्ठां च मृत्युं गणयति। सत्यभाषणं सर्वोत्कृष्टं तपः विद्यते। सत्यभाषणस्य अभ्यासेन एव मनुष्यः महात्मा, त्यागी, तपस्वी च भवति। सत्यस्य प्रतिष्ठया एव संसारस्य कल्याणं भवति। सत्यस्य व्यवहारेण एव देशः, समाजः जातिः च उन्नतिं प्राप्नुवन्ति। असत्यभाषणं पापानां मूलम् अस्ति। अतएव उच्यते—नहि सत्यात् परो धर्मो नानृतात् पातकं परम्। असत्यभाषणेन नरस्य पतनं भवति। सत्यस्य प्रभावेण एव राजा युधिष्ठिरः विजयम् अलभत। सर्वेषाम् एतत् कर्तव्यम् अस्ति यत् ते उन्नत्यै सदा सत्यं वदेयुः।

(३) परोपकारः

परेषाम् उपकारः परोपकारः अस्ति। अन्येषां हितकरणम्, निर्धनेभ्यः दानम्, असहायानां सहायता, एतत् सर्वं परोपकारः एव उच्यते। संसारे परोपकारः एव स गुणः अस्ति येन मनुष्येषु सुखस्य प्रतिष्ठा अस्ति। समाजसेवायाः भावना, देशप्रेम्णः भावना, देशभक्तेः भावना, दीनोद्धारस्य भावना, परदुःखेषु सहानुभूतिः च परोपकारस्य भावनया एव सम्भवति। परोपकारकरणेन मनुष्यस्य हृदयं पवित्रं निर्मलं सरलं विनीतं च भवति। परोपकारी अन्यस्य दुःखं स्वकीयं मन्यते, तस्य नाशाय च प्रयत्नं करोति। दीनेभ्यः दानं ददाति, निर्धनेभ्यः धनं ददाति, वस्त्रहीनेभ्यः वस्त्राणि ददाति, पिपासितेभ्यः जलं ददाति, क्षुधितेभ्यः अन्नं ददाति, अशिक्षितेभ्यः विद्यां च ददाति। प्रकृतिः अपि परोपकारस्य शिक्षां ददाति। परोपकारार्थं सूर्यः तपति, चन्द्रः प्रकाशं ददाति, वायुः चलति, नद्यः वहन्ति, वृक्षाः च फलानि वितरन्ति।

(४) उद्योगः

संसारे सर्वे जनाः सुखम् इच्छन्ति। न कोऽपि जनः दुःखम् इच्छति। सुखं पुरुषार्थेन विना न सिध्यति। उद्योगेन एव मनुष्यः धनं लभते, विद्यां लभते, संसारे गौरवं प्राप्नोति, कलासु कुशलतां प्राप्नोति, जगति कीर्तिं च लभते। ये जनाः पुरुषार्थं न कुर्वन्ति, ते न सुखं लभन्ते, न शान्तिं प्राप्नुवन्ति, न विद्यां लभन्ते, न कलासु कुशलतां प्राप्नुवन्ति, न च जगति कीर्तिं लभन्ते। उद्योगः एव जीवनस्य आधारशिला अस्ति। उद्योगेन एव सर्वाणि कार्यणि सिध्यन्ति, न तु मनोरथमात्रेण। अतएवोक्तम्—उद्यमेन हि सिध्यन्ति कार्याणि च मनोरथैः। उद्यमेन एव निर्धनाः धनिनः भवन्ति, विद्याहीनाः विद्यासु निपुणाः भवन्ति, निर्बलाः सबलाः भवन्ति, दुःखिनः च सुखिनः भवन्ति। संसारे यावन्तः अपि महापुरुषाः अभवन्, ते सर्वे अपि उद्योगम् एव अकुर्वन्। यः कश्चित् जनः सफलताम् इच्छति स उद्योगम् एव आश्रयेत्।

(५) वसन्तः ऋतुः

वर्षे षड् ऋतवः भवन्ति। प्रथमं वसन्तः ऋतुः आगच्छति। अस्मिन् ऋतौ सर्वैः वृक्षाः सर्वाः लता च फलैः पुष्पैः च युक्ताः भवन्ति। सर्वेषु वृक्षेषु नवीनानि पत्राणि भवन्ति। आम्रेषु मञ्जर्यः आगच्छन्ति। आम्रस्य वृक्षेषु कोकिलाः मधुरेण स्वरेण कूजन्ति। सरोवरेषु कमलानि विकसन्ति। तेषु भ्रमराः सानन्दं विचरन्ति। भ्रमराः कमलानां रसं पीत्वा मधुरं गुञ्जन्ति, इतस्ततः भ्रमन्ति च। अस्मिन् ऋतौ शीतस्य अन्तः भवति। शीतलः मन्दः सुगन्धिः च वायुः वहति। अयम् ऋतुराजः इति कथ्यते। अयम् अतीव सुखदः ऋतुः भवति।

(६) ग्रीष्मः ऋतुः

अस्मिन् इतौ सूर्यस्य किरणाः तीक्ष्णाः भवन्ति। सूर्यः भूमिम् अत्यधिकं तापयति। उष्णः तीव्रः च वायुः वहति। अल्पे अपि परिश्रमे कृते स्वेदः प्रवहति। नद्यां स्नानं रुचिकरं भवति। मध्याह्ने सूर्यस्य तापः तीव्रः भवति, अतः प्रातःकालः सायंकालः च सुखकरौ भवतः। मध्याह्ने बहिः गमनं न सम्भवति, अतः छायासु शयनं रुचिकरं भवति। पिपासा अधिकं बाधते। शरीरे शिथिलत्वं संजायते। कार्येषु मनः न लगति। केचन आतपेण रुग्णाः भवन्ति। वृक्षाः लताः च प्रायः शुष्यन्ति।

(७) वर्षा ऋतुः

अस्मिन् ऋतौ सर्वतः जलेन परिपूर्णाः मेघाः दृश्यन्ते। कदाचित् गर्जन्ति, कदाचित् वर्षन्ति च। मेघानां गर्जनं श्रुत्वा मयूराः नृत्यन्ति। महता वेगेन जलं वर्षति। नद्यः सरोवराः च जलेन पूर्णाः भवन्ति। सर्वत्र जलम् एव दृश्यते। मेघेषु विद्युत् पुनः पुनः द्योतते। अस्मिन् ऋतौ कृषकाः मोदन्ते। ते क्षेत्राणि कर्षन्ति, बीजानि वपन्ति च। सर्वतः भूमिः शस्यैः श्यामला दृश्यते। वर्षासु जनाः आतपत्रं गृहीत्वा बहिः गच्छन्ति। जलेन परिपूर्णाः मार्गाः मलिनाः भवन्ति। रात्रौ खद्योताः दृष्टिगोचराः भवन्ति।

(८) श्रीरामचन्द्रः

श्रीरामचन्द्रः पुरुषोत्तमः अभवत्। तस्य पितुः नाम दशरथः आसीत्। तस्य मातुः च नाम कौशल्या आसीत्। तस्य त्रयः भ्रातरः आसन्-लक्ष्मणः, भरतः, शत्रुघ्नः च। स बाल्यकाले एव सर्वासु विद्यासु कुशलतां प्राप्तवान्। स धनुर्विद्यायाम् अतीव निपुणः आसीत्। राज्ञः जनकस्य पुत्र्या सीतया सह तस्य विवाहः अभवत्। पितुः दशरथस्य आज्ञां पालयित्वा स चतुर्दशवर्षाणि वने अवसत्। तत्रैव रावणः सीताम् अहरत्। युद्धे रावणं हत्वा रामः अयोध्याम् आगच्छत्। तत्र राज्यं च प्राप्तवान्। तस्य राज्यम् आदर्शरूपम् आसीत्। अधुनापि तस्य राज्यं रामराज्यम् इति जनाः सादरं स्मरन्ति।

(९) श्रीकृष्णः

भगवान् श्रीकृष्णः महात्मा महायोगी च आसीत्। तस्य पिता वसुदेवः, माता देवकी च आस्ताम्। स बाल्यकाले एव सर्वासु विद्यासु महतीं योग्यतां प्राप्नोत्। स शस्त्रविद्यायाम् अतीव निपुणः आसीत्। मुरलीवादने तु अद्वितीयः अभवत्। स बाल्यावस्थायाम् एव बहूनां राक्षसानां वधम् अकरोत्। स महानीतिज्ञः आसीत्। युद्धे अर्जुनः किंकर्तव्यविमूढः अभवत्। भगवान् श्रीकृष्णस्तस्मै गीतायाः उपदेशम् अददात्। भगवद्गीता न केवलं भारतवर्षे, अपि तु सम्पूर्णे जगति आदरेण पठ्यते। तस्य जन्मतिथिः श्रीकृष्ण-जन्माष्टमी इति पर्वरूपेण भारतवर्षे सर्वैः सोत्साहं सम्मान्यते।

(१०) श्री जवाहरलाल नेहरुः

श्री जवाहरलाल नेहरुः न केवलं भारतवर्षस्य, अपि तु विश्वस्य महती विभूतिः आसीत्। तस्य पिता श्रीमोतीलालनेहरुः जननी च स्वरूपरानी आस्ताम्। स बाल्यकाले विदेशं गत्वा तत्र आङ्ग्लभाषायाः अध्ययनम् अकरोत्। स गुणानाम् आकरः, धैर्यस्य धाम, विद्वत्तायाः निधिः, अहिंसायाः प्रबलः प्रचारकः, राजनीति-विशारदः, असमः देशभक्तः च आसीत्। स देशस्य स्वाधीनतालाभाय बहुवारं कारावासं प्राप्तः। स सप्तदशवर्षाणि प्रधानमन्त्रिपदम् अलङ्कार। तस्य पुत्री श्रीमती इन्दिरागान्धिः अपि एकादशवर्षाणि प्रधानमन्त्रिपदम् अलमकरोत्।

(११) ग्रामजीवनम्

भारतवर्षः ग्रामप्रधानः देशः अस्ति। अधिका जनता ग्रामेषु एव निवसति। ग्रामवासिनः जनाः ग्रामीणाः इति कथ्यन्ते। ग्रामीणानां जनानां दिनचर्या शोभना शिक्षाप्रदा च भवति। ग्रामेषु ग्रामीणाः जनाः प्रातः चतुर्वादने उत्तिष्ठन्ति। ते शौचं स्नानं सन्ध्याम् अन्यत् च आवश्यकं कार्यं कृत्वा स्वकीयेषु कार्येषु संलग्नाः भवन्ति। ग्रामान् परितः शस्यैः पूर्णानि क्षेत्राणि भवन्ति। सर्वतः शस्यश्यामला भूमिः दृश्यते। तत्र उद्यानेषु सुन्दराणि पुष्पाणि फलानि च दृश्यन्ते। ग्रामेषु स्वच्छः वायुः प्रवहति। ग्रामेषु शुद्धं जलम्, स्वच्छः वायुः, शुद्धं दुग्धम्, शुद्धं घृतम्, शुद्धानि खाद्यवस्तूनि च प्राप्तानि भवन्ति। अतः ग्रामेषु स्वास्थ्यं समीचीनं भवति। तत्र जनाः हृष्टाः पुष्टाः बलवन्तः प्रसन्नाः भवन्ति। ग्रामेषु जीवनम् अति सुन्दरं भवति।

(१२) नगरजीवनम्

भारतवर्षे बहूनि नगराणि सन्ति। नगरेषु जीवनं सुखदं रुचिकरं च भवति। नगरवासिनः जना नागरिकाः इति कथ्यन्ते। नगरेषु सुविधाः अधिकाः सन्ति, अतः सर्वे अपि नगरेषु एव निवासम् इच्छन्ति। नगरेषु विद्याध्ययनार्थं विद्यालयाः महाविद्यालयाः विश्वविद्यालयाः च भवन्ति। तत्र यः यावत् पठितुम् इच्छति, तावत् पठितुं शक्नोति। तत्र यानस्य, धूम्रयानस्य, स्वच्छेषु भवनेषु निवासस्य, पठनस्य, पाठनस्य, आदानस्य, प्रदानस्य, अन्येषां जीवनोपयोगिनां वस्तूनां च बहुविधा सुविधा भवति। तत्र जीविकायाः उपार्जनस्य च बहवः सुविधाः सन्ति। तत्र जनाः सरलतया जीविकायाः निर्वाहं कर्तुं समर्थाः भवन्ति। तत्र आमोदस्य प्रमोदस्य मनोरञ्जनस्य च बहूनि साधनानि भवन्ति, यैः जना मनोरञ्जनं कुर्वन्ति। नगरजीवनम् सर्वेभ्यः रोचते।

(१३) आदर्शः गुरुः

शास्त्रेषु गुरोः बहु महत्त्वं वर्णितम् अस्ति। गुरुः मनुष्यं मनुष्यं करोति। आदर्शः गुरुः सः अस्ति, यः यथा छात्रान् उपदिशति, तथैव स्वयम् अपि आचरणं करोति। छात्राः गुरुं दृष्ट्वा, तस्य आचरणं च दृष्ट्वा, तथैव आचरणं कुर्वन्ति। आदर्शगुरोः कर्तव्यम् अस्ति यत् स शिष्यं पुत्रवत् गणयेत्, तं पापात् निवारयेत्, तं सन्मार्गम् आनयेत्, तं सद्गुणान् शिक्षयेत्, तं सत्कर्मसु योजयेत्, तं हितकार्येषु नियोजयेत्, तं सर्वाः विद्याः स्नेहेन पाठयेत्। आदर्शः गुरुः सदा छात्राणां हितम इच्छति। शिष्याणां हितार्थं बहूनि दुःखानि अपि सहते, परन्तु सदैव तेषां हित करोति। स सदा स्वसमयं पठने पाठने च यापयति। स आस्तिकः धार्मिकः विनीतः सुशीलः सदाचारी च भवति। स सदैव वन्दनीयः भवति।

(१४) छात्राणां कर्तव्यम्

छात्राणां प्रधानं कर्तव्यम् अस्ति यत् ते स्वगुरूणाम् आज्ञां पालयन्तु। गुरूणाम् आज्ञायाः पालनं छात्राणां पवित्रं कर्तव्यम् अस्ति। गुरूणाम् आज्ञायाः पालनेन एव छात्रः संसारे उन्नतिं कर्तुं समर्थः भवति। गुरूणाम् आशीर्वादेन एव छात्रः सर्वाः विद्याः सरलतया शिक्षते। छात्राणां कर्तव्यम् अस्ति यत् ते गुरूणां सेवां कुर्वन्तु, सावधानतया विद्यां पठन्तु, विद्यायाः अध्ययने चित्तं ददतु, सत्कर्मसु प्रवृत्ताः भवन्तु, दुर्गुणेभ्यः निवृत्ताः भवन्तु, आस्तिकाः भवन्तु, पापेभ्यः विरमन्तु, सदाचारस्य पालने मनः योजयन्तु, ब्रह्मचर्यं पालयन्तु, विनीताः सुशीलाः च भवन्तु, मातृणां पितृणां च सेवां कुर्वन्तु, स्वज्येष्ठानाम् आज्ञां पालयन्तु, सदा स्वस्य उन्नत्यै च प्रयत्नं कुर्वन्तु। ये एवंप्रकारेण स्वकीयं जीवनं यापयन्ति, ते जीवने उन्नतिं कुर्वन्ति, सफलाः च भवन्ति।

(१५) स्वदेश-रक्षा

जगति स्वकीयः देशः सर्वोत्तमः मन्यते। उच्यते च—जननी जन्मभूमिश्च स्वर्गादपि गरीयसी। स्वदेशः स्वर्गाद् अपि गुरुतरः पूजनीयः च अस्ति। जगति ये देशाः उन्नताः सन्ति, ते सर्वे एव स्वदेशं सर्वोत्तमं मन्यन्ते। ते स्वदेशस्य कृते सर्वस्वम् अपि त्यक्तुम् उद्यताः भवन्ति। स्वदेशस्य रक्षा मनुष्यस्य सर्वोत्तमं कर्तव्यम् अस्ति। यदि देशः सुरक्षितः अस्ति, तर्हि देशे उद्योगाः सर्वाः योजनाः च सफलाः भविष्यन्ति। यदि देशः असुरक्षितः, तर्हि केनापि प्रकारेण देशस्य उन्नतिः न सम्भवति। अस्माकं ये महापुरुषाः अभवन्, ते सर्वे अपि देशस्य रक्षार्थं बहूनि दुःखानि असहन्त। श्रीमहाराणाप्रतापः, श्रीशिवाजी, महात्मा गान्धिः, श्री सुभाषचन्द्रः, श्री जवाहरलाल नेहरुः देशरक्षायै बहूनि दुःखानि असहन्त, जीवनं च सफलं कृतवन्तः। स्वदेशस्य रक्षा सर्वेषाम् एव प्रधानं कर्तव्यम् अस्ति।

(१६) कृषकः

कृषकः प्रतिदिनं प्रातःकाले उत्थाय वृषभान् आदाय क्षेत्रं गच्छति। स तत्र क्षेत्राणि कर्षति। कृष्टेषु क्षेत्रेषु बीजानि वपति। बीजेभ्यः अंकुराः जायन्ते। अंकुरेभ्यः शस्यं जायते। शस्येन एव सम्पूर्णः देशः धनवान् धान्यवान् च भवति। भारतवर्षे ग्रामीणानां जनानां मुख्यं कर्म कृषिकर्म अस्ति। ग्रामीणाः कृषकाः कठोरं परिश्रमं कुर्वन्ति। ते ग्रीष्मर्तौ अतिप्रतप्ते दिवसे मध्याह्ने अपि कृषिकर्मणि संलग्नाः भवन्ति। एवम् एव वर्षासु शीतकाले च ते कठिनं परिश्रमं कुर्वन्ति। ते स्वकीयानि सुखानि त्यक्त्वा देशस्य कृते दुःखानि सहन्ते। यदि ते एवं कठिनं कर्म न कुर्युः, तर्हि देशः धनेन धान्येन च पूर्णः न भविष्यति। कृषि-कर्म श्रेष्ठं कर्म अस्ति। सर्वः अपि देशः कृषकाणाम् ऋणी वर्तते। ते सदैव सम्माननीयाः सन्ति।

(१७) सज्जनः

यः धार्मिकः विनीतः परोपकारी सदाचारी च भवति स सज्जनः कथ्यते। सज्जनः सदा परेषां दुःखे दुःखी भवति। स परेषाम् उपकारं करोति। स यथा वदति तथैव करोति। स यथा करोति, तथैव वदति। तस्य वचने कार्ये विचारे च एकता भवति। स परेषाम् उपकारं धर्मं मन्यते। स परोपकारे आनन्दं लभते, प्रसन्नः च भवति। स सर्वेषु दयां करोति। स सर्वत्र सुखम् इच्छति। स ऐश्वर्यं प्राप्य गर्वितः न भवति। स सुखे अधिकं हर्षं न प्राप्नोति, न च दुःखे अधिकं खेदम् अनुभवति। स सदा प्रियं हितं च वचनं वदति। स सर्वस्य हितं चिन्तयति। स सर्वेषु जीवेषु स्नेहं करोति। स विपत्तौ धैर्यम् आश्रयते, सम्पत्तौ विनीतः भवति, यशसि रुचिं करोति, सभासु मधुरं भाषणं ददाति, धर्मकार्येषु विद्याध्ययने सत्कर्मसु च स्वसमयं यापयति। सज्जनः सदैव वन्दनीयः भवति।

(१८) दुर्जनः

यः अधार्मिकः अविनीतः परेषाम् अहितकारी दुराचारः च भवति स दुर्जनः कथ्यते। दुर्जनः परेषाम् अहितं चिन्तयति। स देशस्य जातेः संसारस्य च अहितं चिन्तयति, सर्वस्य अहितं च करोति। स यद् वदति, ततः विपरीतम् आचरति, विपरीतं एव कार्यं च करोति। तस्य भाषणे कार्ये चिन्तने च एकता न भवति। दुर्जनः सदा दोषम् एव चिन्तयति, दुर्गुणान् एव आचरति, उचितं कर्म त्यजति, अनुचितं कर्म आचरति, मातुः पितुः गुरूणां च आज्ञां न पालयति, समाजे दुर्गुणानाम् एव प्रचारं च करोति। स सम्पत्तिं प्राप्य गर्वितः भवति, विपत्तौ अत्यधिकं दुःखम् अनुभवति, कलहं रुचिकरं मन्यते, गृहे शूरतां दर्शयति, युद्धे भीरुः भवति, दुष्कर्मसु च प्रवृत्तः भवति। दुर्जनः समाजे सदा अनादरं लभते।

(१९) मम विद्यालयः

मम विद्यालयः नगरे वर्तते। विद्यालयस्य भवनम् अतीव सुन्दरम् अस्ति। तत्र एकम् उद्यानम् अपि अस्ति। उद्याने सुन्दराणि पुष्पाणि सन्ति। अहं प्रतिदिनं विद्यालयं गच्छामि। मम अन्ये भ्रातरः भगिन्यः च अपि विद्यालयं गच्छन्ति। विद्यालयः मह्यम् अतीव रोचते। तत्र मम मनः पठने लगति। अहं तत्र ध्यानेन विद्यां पठामि, लेखं च लिखामि। अहं प्रतिदिनं विद्यालयं गत्वा गुरून् प्रणमामि। गुरवः स्नेहेन पाठं पाठयन्ति। ते सदाचारस्य अनुशासनस्य च उपदेशं ददति। मम विद्यालये अध्यापकानां संख्या पञ्चाशतः अधिका वर्तते। छात्राणां च संख्या सहस्रादधिका अस्ति। अध्यापकाः विविधासु विद्यासु पारंगताः सन्ति। विद्यालये एकं विशालं क्रीडाक्षेत्रम् अपि अस्ति। तत्र छात्राः क्रीडन्ति। बहवः क्रीडाप्रतियोगिताः भवन्ति। मम विद्यालयस्य छात्राः पठने क्रीडने धावने भाषणे अनुशासनपालने च अतीव निपुणाः सन्ति।

(२०) भारतवर्षम्

भारतवर्षम् अस्माकं जन्मभूमिः अस्ति। भारतः देशः संसारे प्रसिद्धः अस्ति। अस्य एव अन्नेन जलेन वायुना च वयं पालिताः पोषिताः च भवामः। इयं जन्मभूमिः भारतभूमिः अस्माकं माता अस्ति। अस्याः महिमा वर्णयितुं न शक्यते। इयं सा भारतभूमिः अस्ति, यत्र बहवः महर्षयः देशभक्ताः महाराजाः च अभवन्। ये स्वबुद्धिबलेन स्वबाहुबलेन च विश्वस्य विजयम् अकुर्वन्। यदा सर्वस्मिन् जगति अविद्यायाः प्रसारः आसीत्, तदा अत्र ऋषयः वेदानां गानं कुर्वन्ति स्म। ते विदेशान् गत्वा ज्ञानस्य प्रसारम् अकुर्वन्। अत्र एव श्रीरामचन्द्रः, श्रीकृष्णः, गौतमबुद्धः, ऋषिः दयानन्दः, अन्ये च महापुरुषाः अभवन्, येषां नाम न केवलं भारतवर्षे, अपि तु समस्ते जगति प्रसिद्धम् अस्ति। अस्माकं कर्तव्यम् अस्ति यद् वयं भारतवर्षस्य सदा उन्नतिं कुर्याम, सदा अस्य रक्षां च कुर्याम।